CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मानसी



रामकरण शर्मा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding:IKS-MoE-Grant-2

अनुवर्त्तते मानसी गगनवाणीम्। सम्भूय चतुर्दश (5441 श्लोकाः) सामयिकभावनाभाविताः सौन्दर्यसर्गात्मिकाः कविता अत्रोपनिबद्धाः। अत्र वर्त्तेते द्वे कथाकाव्यात्मके शतके अपि 'मानसमरालीयम्', 'नेता विनेता च' इति शीर्षके। पूर्वत्र संख्यामतिशेते सांख्यम्। अपरत्र च गुरुशक्तिर्महीयते नेतृशक्ति-संस्कारिका। अन्या द्वादश कविता अपि तथैवाभिव्यञ्जिकास्तत्तासारमाध्यात्मिकीनामाधिभौतिकीनां च भावनानां विविधसौन्दर्यपरिधानानाम्।

सेयं मानसी सौन्दर्याभिव्यक्तिः कल्पतां प्रसादाय सहृदयानाम्।

मूल्यम् 200/-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्री 1008 श्रीमद्गुरुचरणः श्री-
विमलानन्द स्वामि-चरणेभ्यः
सादरं सप्रश्रयं
समर्पयति

चै० कृ० १०मी [illegible]

२०२६

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मानसी

रामकरणशर्मा

प्रतिभा प्रकाशन, दिल्ली

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रथम संस्करण 2000 ई॰

© डॉ॰ रामकरणशर्मा

मूल्य : 200/-

प्रकाशक

डॉ. राधेश्याम शुक्ल
एम.ए., एम.फिल्., पी-एच.डी.

प्रतिभा प्रकाशन
(प्राच्य-विद्या-प्रकाशक एवं पुस्तक-विक्रेता)
29/5 शक्ति नगर, दिल्ली-110 007
दूरभाष : 7451485

अक्षर संयोजक

इम्प्रेशन इंडिया ग्राफिक्स
बी-49, जे.एफ.एफ. काम्पलेक्स,
झण्डेवालान, नई दिल्ली-110055
दूरभाष : 7520255, 7520256

मुद्रक :

तरुण ऑफसेट, दिल्ली

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

MĀNASĪ

(A Collection of Sanskrit Poems)

By

RAMKARAN SHARMA

Pratibha Prakashan
Delhi

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Ist Edition 2000 A.D.

Rs. 200/-

Published by :

Dr. Radhey Shyam Shukla
M.A., M.Phil., Ph.D.

For **Pratibha Prakashan**
(Oriental Publishers & Booksellers)
29/5, Shakti Nagar, Delhi-110007
Phone : 7451485

Composed by :

For Impression India Graphics
B-49, Flatted Factory Complex
Jhandewalan New Delhi - 55
Phones : 7520255, 7520256

Printed at :

Tarun Offset, Delhi

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीगणेशप्रसादाय शाहिने शिवमूर्त्तये।
सन्निष्ठाजपशीलाय वात्सल्यनिधये नमः।।

इत्येकादश्यां लब्धजन्मनामुभयीमेकादशीमविच्छिन्नमुपासीनानां दशमीस्थानामप्येकादश्यामेव दिवमुपेयुषामादर्शसत्प्रेरणानुशासन-दुष्करव्रतानामपि कारुण्य-वात्सल्य-मार्दवानुस्यूतान्तःकरणानां श्वशुरमहोदयानां दिव्ययोश्चरणकमलयोः
'मानसीं' प्रणतिमिमां सादरं सप्रश्रयं समर्पयति।

– रामकरणशर्मा 'ब्रह्मचारी जी'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ नमः शिवाय

प्रणतिः

गुरुचरणैः प्रेरितः कवयामि किमपि किमपि बाल्यादेव। प्राकाशयमपि काँश्चन तादृशान् प्रयोगान् प्रेयोभिः प्रकाशकैरागृहीतः सहृदयैः सुहृद्भिश्च संवर्धितः। नाहं "कवियशःप्रार्थी"। अतो विगतोपहास्यताऽनुपहास्यताभावनः समाराधयाम्येव, प्रणमाम्येव परममातरं गीर्वाणवाणीं तदीयैरेवाक्षरैरमरैः। तस्मिन्नेव क्रमे प्रणतिरियमपि "मानसी" सादरं समर्प्यते तस्यै तदुपासकेभ्यश्च नानादिग्देशवास्तव्येभ्यः सहृदयेभ्यः सुहृद्भ्यः। आशासे सेव तेऽपि सकृपं स्वीकरिष्यन्त्येव यथाकथमपि गुम्फिता इमाः सुमनसः सहजाक्षरपदवाक्यसौरभसूत्राति। प्रार्थये पुनः स्खलितानि तानि सानुग्रहं यथापूर्वं ते मृष्यन्तामिति च।

सम्भूय चतुर्दश कविता अत्र सङ्कलिताः। द्वे शतके अप्यत्र संयोजिते स्तः मानसमरालीयम्, नेता विनेता चेति। द्वे अपि कथाकाव्यात्मके वर्तेते। पूर्वस्य सम्बन्धोऽप्यस्ति शिवशुकीये प्रस्तुतया 'वकानां सभायां गतो राजंहसः' इत्यनया कवितया। संख्या वन्ध्यतां सांख्यं वेति प्रश्नः कथाकाव्यस्यास्य मूलम्। तथैव द्वितीयं कथाकाव्यं चित्रगुप्तस्य समक्षमुपस्थितस्य कस्यचिदाधुनिकस्य नेतुः कस्यचिद् विनेतुश्च (गुरोः) चित्रं प्रस्तौति तद्द्वारा च गुरुशक्तेर्महिमानं निरूपयति। "विशुद्धिः श्यामिका ऽपि वा" ऽनयोः प्रयोगयोर्निर्णेष्यते सहृदयैर्बन्धुभिरेव।

अन्या द्वादश कविता अपि नूतनप्रयोगात्मिकाः सन्ति। यथा होलिकाखेलिका प्रह्लादशक्ते र्लिप्साशक्तेश्च क्रीडाकौशलं व्यनक्ति। तथैव "श्रान्तः" प्रेरयति विश्रान्तिम्। "उच्चैश्रवाः" प्रतिनिधत्ते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकसेवकस्य 'न्याय्यात् पथो ऽप्रविचलनम्''। सेयं मानसी सौनदर्यपरिधानानां विविधानामाध्यात्मिकीनामाधिभौतिकीनां भावनानां संग्रहोऽस्ति वस्तुतः।

सर्वत्रैव मानवताया आधुनिक्याः समस्या आधुनिकैः स्वरैरुपवर्णिताः। आशा अपि नूतनवर्णवेषाः प्रायेण सर्वत्र सन्ति सहचर्यः समस्यानाम्।

प्रख्यातो हिन्दीसाहित्यकारः श्रद्धेयः श्री रामवृक्ष बेनीपुरी एकदाऽस्मानसूचयद् "बहुकृत्वोऽहमगच्छमागरानगरम्। किन्तु न जातु मया व्यलोकि ताजप्रासादः।" प्रश्नः कृतोऽस्माभिः 'अपि न रोचते ताजप्रासादो भवते?' तेनोत्तरं दत्तम् 'रोचततेतमां मे प्रासादः सः। किन्तु तमवलोक्य तद्विषयिणी मामकी सौन्दर्यकल्पना मानसी बाध्येतेति शङ्कया जहामि तन्मूर्त्तसाक्षात्काराभिनिवेशम्। सम्भवति, चन्द्रलोके दृष्टे चान्द्री सौन्दर्यभावना मानसी विलुप्येतैव। भावना मानसी सदैवातिशेते मूर्त्तां साक्षात्कृतिम्'' इति। मानस्यामन्यत्र वा व्यक्तानां सौन्दर्यसर्गाणां मूले प्रायेण सर्वत्र भावना मानसीयमेव प्राधान्यं भजते। न मयाऽवलोकितं मानसं सरः। चित्रगुप्तसभायां कदा समुपस्थास्य इत्यपि न विदितं मे। उच्चैःश्रवास्तथैव सर्वेषामस्माकमपरिचितः। यदाह चरकः 'प्रत्यक्षमल्पमनल्पमप्रत्यक्षमिति' तत् सौन्दर्यसर्गरचनास्वपि चारितार्थ्यं भजते। अपि वयं चरकमनुवदाम "प्रत्यक्षमसुन्दरम्। सुन्दरमप्रत्यक्षम्''? इति।

सेयं मानसी प्रणतिः सादरं समर्प्यते सुहृद्भ्यः सहृदयेभ्यः। प्रसीदन्तु तेऽनुगृह्णन्तु च मामेतदीयगुणदोषविवेचनैर्यथासमय यथौचित्यैमिति प्रार्थये।

प्रकाशनायास्मै कृतभूरिपरिश्रम आयुष्मान् सतीशकुमार आशीर्भाजनं मे। तथैव धन्यवादार्हः प्रतिभाप्रकाशनाध्यक्षो डॉ. राधेश्याम शुक्लः प्रणतिसुमनसामासां मानसीनां विकिरणाय सर्वासु दिशास्विति।

संस्कृतदिवसः २०५६
२६.८.१९९९

सहृदयानामाश्रवः
रामकरणशर्मा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

काव्यसूची

	प्रणतिः	*viii*
१.	मानसमरालीयम्	१
२.	नूतनं जीवनम्	२२
३.	स्वगतं सहजतायाः	२५
४.	प्रेमा	२९
५.	उच्चैःश्रवाः	३३
६.	स्वयं प्रदाह्य	३७
७.	याम्यहम्	४६
८.	समता, ममता	५०
९.	विनेता नेता च	५६
१०.	द्वैताद्वैतम्	७३
११.	श्रान्तः	७७
१२.	होलिकाखेलिका	८४
१३.	सम्बन्धना	८६
१४.	जाने न किमपि	९६

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मानसमरालीयम्

1.

कदाचित् समायान् निशीथे वकाली
मरालालये संहता काऽप्यकस्मात्।
मरालोऽपि सुप्तोत्थितो विस्मितः स–
न्नलिन्दं समागत्य तामभ्यनन्दत्॥

2.

तृणैर्वाग्भिरद्भिर्हृदा चातिथेयः
स तस्यै शुभं स्वागतं व्याजहार।
"इदानीं सुखं शेरतामत्र शान्तं
भवन्तः श्रमव्याकुलाः शय्यकासु॥

3.

अशेत स्वयं राजहंसः प्रतीतः
प्रसन्नोऽतिथीन् स्वागमय्यार्धरात्रे।
वकाली तु रात्रावपि स्वापमुक्ता
सुपाठीनभुक्त्यै सरः प्राप तूष्णीम्॥

4.

सुपाठीनभुक्तिं विधाय प्रकामं
मुहूर्त्ते पुनर्ब्राह्म आजग्मुरेते।
मरालः प्रबुद्धो बुधस्तानपृच्छत्
सुखस्वापमग्रे दधत् पादमेकम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

5.

“सुखस्वाप एवाभवद् दुर्लभो नः
सजातीयदुर्नीतिदुर्धारकाणाम्।
बुभुक्षैव नः सञ्चिता सम्पदास्ते
भवद्वञ्चकानामिति प्रोचुरेते॥

6.

सजातीयकास्ते सजातीयकान्नः
क्षणैरेव विस्मृत्य कार्त्तज्ञ्यभावम्।
तटे कण्टकैरावृते सन्नियोज्य
स्वयं सर्वमत्स्याहृतौ सन्ति लीनाः॥

7.

तदानीं भवाँस्तैर्बहिष्कारितोऽभू-
दिदानीं बहिष्कारिताः स्मो वयं तैः।
क्व भेदः सजातौ विजातौ च लोभा-
धिकारान्धिताक्षस्य कीदृक् कदा कः॥

8.

“वयं लज्जिताः स्मस्तदानीं सुवर्ण-
प्रभैस्तैः प्रसूनैर्गृहीताः प्रकामम्।
तमेवाक्षतैः पूजयन्तो वकेशा-
सने संख्ययाऽध्यासयामाप्तवेषम्॥

9.

“वयं वञ्चितास्तेन चाटूक्तिमन्त्रैः
स्वयं सर्वमादित्सुना लुब्धकेन।
वयं मानसात् सद्य एवच्छलेन
पृथक् प्रेषिताः पल्वले नीरसेऽस्मिन्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

10.

''इयं पद्धती राजभावाय सर्वान्
गुणानुज्झतां बिभ्रतां दुर्गुणाँस्तान्।
समेषां सजातीयवादे रतानां
सितास्यस्रजां स्वान्तकृष्णोरगाणाम्॥

11.

''वयं त्वमुष्य शक्तिसञ्चयेऽभवाम साधकाः
स एष मारकोऽस्ति नः कुधीर्हृतात्मसम्पदाम्।
ततो घनान्धकारसंवृते निशीथमण्डिते
क्षणे वयं समागमाम मन्दिरं सखे तव॥

12.

''चटूक्तिलुप्तनेत्रशक्तयो वयं तदा पुन-
स्तमेव चार्चयाम गन्धपुष्पधूपदीपकैः।
मदज्वरोऽन्ववर्त्ततैव वत्सराँस्तु पश्चषान्
प्रदक्षिणमकुर्म तस्य सन्ततं बुभुक्षिताः॥

13.

''वयं धूर्त्तवर्यास्तदीयास्तदानीं
विधेया अनृत्याम तस्याभिषेके।
बभूवुर्निशास्वेव तस्योत्सवास्ते
वयं त्वास्म नाट्ये नटा एव मूर्खाः॥

14.

''अमीभिस्त्वसौ वत्सरैः सुन्दरघ्नः
समस्तां जघानाम्बुजारामशेभाम्।
व्यघात् सैष सन्धिं वकैरन्यदीयै-
र्वराहैश्च सौन्दर्यसंहारदर्पैः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

15.

"विधाता जहौ मानसावासभावं
ययौ शारदा प्रीतिकूटं विषण्णा।
स नामृष्यतास्मानपि ज्ञातवृत्तान्
असावेव पाठीनभोक्ता यथा स्यात्॥

16.

"असत्यं सुगुप्तं हि दुर्गेऽपि सद्यो
विलम्बेन वाऽऽयाति नूनं प्रघाणे।
प्रतीक्षापरं सत्यमत्रोपविष्टं
निगृह्णाति मायामसत्यस्य नूनम्॥

17.

"असत्यं च सत्यात्मकं सत्तदानीं
स्वयं सत्यमेवाभिधत्ते प्रशान्तम्।
अकारं परित्यज्य 'साम्यं' च 'तत्त्वं'
'यमाँ' श्चात्र पञ्चापि धत्ते समग्रान्"

18.

"तदेवं दिवा कश्चिदन्यः प्रधानो
वकानां निशायां स कोऽप्यन्य एव।
सुनिर्भीकमस्मान् विमोह्यातिमात्रं
दधौ स्वं पदं कीर्त्तिमस्मल्लुलुण्ठ॥

19.

"विलम्बेन किन्तु प्रबोधोऽभवन्नः
शिवः केवलः कीर्त्तनीयः स साम्बः।
समत्वं क्वचिन्नान्यतोऽवाप्तुमर्हं
शिवं तं नमामः शिवां तां नमामः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

20.

''त्वमासीर्यदा मानसे राजहंस
स्वयं निःस्पृहः शारदायाः सहायः।
समेषां निसर्गानुगस्तत्सुमुक्तौ
समासीत् समानोऽधिकारः सुभक्तः॥

21.

''नभस्वान् नभो जीवनं भूमिरग्निः
समेषामिमे धायकाः सन्ति सेव्याः।
त्वमासीर्मुखद्वारभूतस्तदानीं
सुपाप्या वय सर्व एवाभवाम॥

22.

''द्विरेफः सरागं स्पृशत्येव पुष्पं
तदीयं रसं किञ्चिदादाय चाप्तः।
सुधां निर्मिमीते त्रिदोषापहां तां
यथा सत्कविः सुप्रसादं तनोति॥

23.

''तथैवास्पृशस्त्वं सरो मानसं तन्
मितं तन्मरन्दामृतं सेवमानः।
त्वया मारनसं मानसेन त्वमासीः
कृतार्थीकृतः सन्ततं राजहंस॥

24.

''स्थली सैव चापोऽपि ता एव संज्ञा
तदीयाऽपि सैवाधुनाऽपि प्रसिद्धा।
न तन्मानसं नाम्बुजं तन्न ते नो
द्विरेफा न वाणी न वीणाऽद्य हृद्या॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

25.

''अभून्मानसः सत्यसौन्दर्यसर्गो
विधातुः पुरा तत् सरो निर्मलापम्।
तदेवाद्य पङ्काविलं मत्स्यगन्धि
लुनीते प्रसादं समेषां समन्तात्॥

26.

''पुराऽजीजनत् कर्दमः पङ्कजालिं
निसर्गेरितः सत्यसौन्दर्यमूर्त्तिम्।
इदानीमपः पङ्किला बिभ्रदेतत्
सरो मानसे नः प्रसूतेऽपि पङ्कम्॥

27.

''भवन्मानमङ्गो विधातुः सभायां
पुराऽऽसीद् यदाऽपेक्षितस्तस्य गृध्नोः।
वयं भोजिताः पायिताश्च प्रकामं
यथा वर्धयेमामुतः पक्षसंख्याम्॥

28.

''वकाः केऽपि पम्पातटाकात् पुनस्ते
समाहूय पूर्वापराब्धिप्रदिग्भ्याम्।
समानं समेकीकृताः प्रीतिभोजे
समे चञ्चुसौन्दर्यभाजा ऽमुना ते॥

29.

''गता प्रीतिरन्यत्र भोजः समाप्तः
समाप्ते तु संख्याजये सद्य एव।
स एवाभवद् भोक्तृभावैकभक्तः
प्रभुः सम्पदां मानसीनां समासाम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

30.

''प्रधानो भवाँस्तस्य शत्रुस्तदानीं
बहिर्मानसात् प्रेष्यतां क्वापि सद्यः।
मनीषा तदीया तदेयं विधातुः
सभायां छलैः पूरिताऽऽसीत् कथञ्चित्॥

31.

''अभूत्तस्य संख्याजयोऽस्माकमेवो–
त्थितैरग्रपादैस्तदा, तत् स वेद।
परस्माद् दिनात् पर्यवर्त्तिष्ट किन्तु
मनीषा सरःसम्पदिद्धा तदीया॥

32.

''तटाः सर्व एवावृताः कण्टकाग्रै –
स्तथा नो यथा दर्शनं तस्य नः स्यात्।
विहारोऽत्र तस्यैव निष्कण्टकः स्यात्
स एकः प्रभुः सम्पदां स्यात् समासाम्॥

33.

''ततः शोषिताः पल्वलास्तेन सर्वे
क्व शाम्येत् पिपासा बुभुक्षा कथं नः।
स एवात्र तस्याथवा बन्धुवर्गः
स्वकीयः समाहारकोऽभून्निधीनाम्॥

34.

''निरस्ताऽखिला रम्यता मानसी सा
वनं भक्षितं पङ्कजानां वराहैः।
सुदर्शं तु पङ्काविलं तत्र नीर
गिरः पङ्कमग्ना सुदर्शा च वीणा॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

35.

"द्विरेफा गताः, सा हि नो पङ्कजश्रीः
सुदर्शास्ततो मक्षिका एव भूयः।
पिकानां क्व आकर्णयेत् कूजितं क्व
क्व सन्दृश्यतां दृश्यमानन्दशालि॥

36.

"गृहे तस्य पाठीनमीनोच्चयोऽ सौ
किरत्येव दुर्गन्धजालं समन्तात्।
न तस्यास्ति लज्जा न वा शान्तसुप्तिः
समेऽन्ये तु पित्तप्रकोपाधिभाजः॥

37.

"क्षितिर्मानसी दूषिता सा समस्ता
तथा जीवनं मानसं पङ्ककीर्णम्।
तमः प्रावृणोन् मानसीं प्रीतिशय्यां
प्रवाताः सदा मानसं कम्पयन्ति॥

38.

समानैव कुक्षिः समेषां तथापि
न सीमाऽस्ति साम्पन्निकानां चयानाम्।
मुधाऽभ्यासवश्या इमे ग्राहरूपा
यदेवाप्यते भूतले चिन्वते तत्॥

39.

"स राजाऽ भवन्नैव संरञ्जनार्थं
प्रजानां सदा लुण्ठनैकाग्रचेताः।
समेषां विपत्तिस्तदीयाऽस्ति सम्पत्
समेषां समृद्धिस्तदीया विपत्तिः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

40.

''पितुः सूनवः सूनुवर्गात् पिता च
स्वसा भ्रातृवर्गात् स्वसुर्भ्रातृवर्गः।
समे तस्य चाटूक्तियुक्तया विभक्ता
अभक्तास्तदर्चाविधौ सन्ति लग्नाः॥

41.

''विभक्तिस्तु सा कारकीया प्रशस्ता
न तस्मै मनाग् रोचते भक्तिभव्या।
विभक्तिस्तदीया तु जम्बीरबिन्दुः
समाजं पयःसागरं सम्भनक्ति॥

42.

''प्रशाखा वृहत्यो ऽथवा लघ्व्य एताः
स्वमूलोद्धृतौ सन्ति सम्भूय लग्नाः।
तदेवं समो मानसाऽनोकहोऽसौ
निजैरेव रात्रिन्दिवं युध्यतेऽङ्गैः॥

43.

''प्रकृत्या प्रतिष्ठापितः कश्चिदेक-
स्तदेकैकशो देवताऽ स्मिन् निसर्गे।
त्वमेवास्यसौ देवता मानसस्य
त्वयैवास्ति साम्यं समं रक्षितव्यम्!॥

44.

''सजातीयतायाः स वेषं निधाय
स्वचञ्चूं सुविस्फार्य सर्वानवादीत्।
''अहं तावक स्त्वं च मे तत्र मा भूत्
क्वचित् संशयः स्वामिनं मां वृणुष्व॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

45.

‘‘विजातीय आसीद् भवानित्यवज्ञा-
ऽऽस्पदं नस्तदानीं विवेकोज्झितानाम्।
विवेके गते याति सामूहिकी वा
विशिष्टा सुशक्तिः सुखं चापि सम्पत्॥

46.

‘‘त्वया मानसं मानसेन त्वमार्सा-
र्मिथः पूजितः प्रीतिभावैकबद्धः।
निसर्गस्य सौन्दर्यलीला समस्ता
शुभश्रव्यदृश्या सुखस्पर्शगन्धा॥

47.

‘‘अलं वाग्मिरामिर्भवानेव भूयात्
प्रभुर्मानसीयो महात्मा विजातिः।
सजातीयवर्गो ऽस्मदीयो ऽस्ति भोक्ता
प्रभुः सोऽस्तु यो भोजयेत् सम्यगस्मान्॥

48.

‘‘भ्रमो ह्येष कश्चित् सजातीय एव
प्रभुः स्यादभीष्टः सजातीयकानाम्।
विवेकी सुहृन्निःस्पृहो योऽपि कोऽपि
स एव प्रभुत्वार्हताधृक् समेषाम्॥

49.

‘‘भवानेव तादृक् प्रभुत्वाधिकारे
नियुक्तो विधात्रा, प्रमाणीकृतं तत्।
प्रफुल्लोदरैस्तैः सजातीयमुख्यैः
प्रजभिञ्जनं धर्म एकोऽस्ति येषाम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

50.

''वयं स्याम पम्पारयीशाः स्वतन्त्रा
भवेस्त्वं रयीशोत्तमो मानसस्य।
वयं सर्व एवागतास्त्वां प्रणन्तुं
भवानेव भर्त्ताऽस्मदीयो न चान्यः''॥

51.

''मानसविपिनविहारी
चकितः श्रुत्वा स वकहृदयवाणीम्।
मनसा मानसपङ्कज-
वनद्विरेफान् सपदि दध्यौ॥

52.

''प्रकृतित एव विवेकी
विसर्गशूरः किमुत्तरं दद्यात्।
मनसा ध्यायन् मानस –
मसौ न तस्थौ ययौ नापि॥

53.

''आहुर्यदपि भवन्तः
सत्यं तत्तत्र नास्ति संशीतिः।
प्रभुता न किन्तु काम्या
विवेकवीणावतां जातु॥

54.

''काम्यतमं मे मानस-
धाम सुलीलास्थली सरस्वत्याः।
सा यत्रापि सुरमते
तदेव मम सर्वतो रम्यम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

55.

''भारत्याः पदमीप्सित-
मनिशं पृष्ठे मम क्वणद्वीणम्।
नान्यत् पदमाभिलषितं
ममेति सम्यग् विजानीत॥

56.

''भोक्तॄणां युष्माकं
निसर्गसिद्धा सुभुक्तिरिष्टा मे।
संख्यागणितं चदुधृत –
मज्ञातं मे विवेकसांख्यभृतः॥

57.

''प्रकृतेरक्षय्ये ऽस्मिन्
भाण्डागारे समेऽधिकृतभोगाः।
चटका स्वयं सचञ्चूति
चिनोति कणकान् क्षितौ प्रातः॥

58.

''नान्यः कोऽपि निसर्गाद्
ऋतेऽस्ति दाता ऽथवा ग्रहीताऽत्र।
कैलासोऽपि निसर्ग-
स्तन्मानसमपि विधिनिसर्गः॥

59.

''मिथ आदानविसर्गा –
त्मिका निसर्गस्य यावदिह लीला।
सहजा स्वयमनुशिष्टा-
ऽनुवर्त्तते तावदखिलमपि रम्यम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

60.

''मामभजत् कमलवनी
तामभिनन्दन्ननन्द भूयोऽहम्।
लीलाऽऽवयो र्निसर्ग -
प्रीतिमवर्धयदियं सहजाम्॥

61.

''लिप्सा यौष्माकीणा
ऽवधीन्निसर्गं समत्वसुषमां च।
नेदानीं तन्मानस-
मसौ द्विरेफो न, न स हंसः॥

62.

''यूयं स्थ ममातिथयो
नमो नमो वः पुनर्नमो भूयः।
जिगमिषुरपि काम्यतमं
देशं तं नाधुनोत्सहे गन्तुम्॥

63.

''अहमस्मि राजहंस-
स्तत्राप्यासं स एव नो इतरः।
वर्त्तिष्येऽपि स एवा-
निशं विवेकैकसम्पदहम्॥

64.

''हे मित्र किन्तु विद्धि
न स मानसराजहंस इह वर्त्ते।
स तु तस्मिन्नेव दिने
दिष्टान्तं विधिसदसि यातः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

65.

''संख्यादुरितकुपङ्का-
दुद्भूतोऽयं नवः कुसुमविटपी।
सांख्यं सौरभमधुना
नाहं कथमपि जिहासामि॥

66.

''मानस एव पुराऽऽसीत्
कृतवसतिर्भारती मदुपसेव्या।
वरदाऽधुना वसति सा
तत्र यतोऽहं कृतनिवासः॥

67.

''वन्देऽनन्तां संख्यां
विश्वविभूतेरनेकरूपायाः।
नतरां कृत्रिमसंख्या-
जयेऽस्मि बद्धादरो जातु॥

68.

''भवदीयामपि संख्यां
वन्दे मम पोषिकां क्षणेऽद्यास्मिन्।
को वेत्ति किन्तु कस्मिन्
क्षीणा सा स्यात् क्षणे ऽसाध्वी॥

69.

''एकल एव विवेका –
नन्दो विकिरति विभामितोऽप्यमुतः।
कृपया बधान नो मां
संख्याबन्धे ऽत्र भवदीये॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

70.

''इत्येवं न स संख्या
बन्धे बद्धोऽभवद् द्विजाधिपतिः।
धात्रैव तदुपकण्ठे
व्यरचि सरो मानसं नव्यम्॥

71.

तेऽपि वकास्तत्रैवा-
वसन्नसेवन्त चापि तं देशम्।
उभये मैत्रीमभजन्
मिथः सुरक्षां समादधतः॥

72.

यत एव राजहंसो
विवेकशाली स, मानसं तत्र।
तत्रैव च कैलास-
स्तत्रैव च शारदा सविधिः॥

73.

जानीहि सिद्धिमेताम्
''इदं न मम''-भावनां हृदयपिहिताम्।
सा सिद्धा चेत् सर्वं
विश्वं ते त्वं च विश्वस्य॥

74.

वकतैव व्यपगमिता
शनैः शनैः शारदासुलयतानैः।
हंसीभूताः सर्वे-
ऽद्यापि सहैवात्र निवसन्ति॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

75.

वन्दे निसर्गलीलां
तां या निर्माय तानवद्यकथान्।
किरति यशः पूज्यानां
दिशि दिशि मानसमरालानाम्॥

76.

नावद्यं किमपि जग-
त्यनवद्यं वा समग्रतः प्रायः।
पुष्णीते प्रकृतिरिमं
सर्गं ज्योतिस्तमोभक्त्या॥

77.

जागरिते तु विवेके
शाकाहारो भवेन्मृगेन्द्रोऽपि।
अहिनकुलमपि रमेत
क्रीडायां, नैव हिंसायाम्॥

78.

प्रभुचरणाम्बुजभृङ्गो
गुञ्जति सामोदसच्चिदानन्दः।
सुमनाः सुमनःकलिका-
रसमादत्ते तथोड्डयते॥

79.

हिंसाभ्यासोऽहिंसा-
भ्यासात् त्याज्यः पतञ्जलेः सुमतः।
मानससरसि नवेऽस्मिन
सर्वेषामभिमतो धर्मः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

80.

धेनुर्मृगेन्द्रशावान्
सस्नेहं स्तन्यमत्र पाययति।
गोवत्सान् सिंही अपि
तथैव सस्नेहमालेढि॥

81.

मृगयाव्यसनः कश्चित्
समागमद्धन्तुमत्र मृगशावान्।
किं स वराकः कुर्यान्
मृगेन्द्रशावैर्हृता झटिति बाणाः॥

82.

नीरसतरुविक्रेता
छेत्तुं कश्चित्तरूनिहागच्छत्।
करिभिः करैस्तदीयात्
प्रसभमपहृतः करात् परशुरेव॥

83.

नृत्यन्तीमे करिणो
मृगेन्द्रशावान् निधाय निजमूर्ध्नि।
हुङ्कारस्य स्थाने
जपति मृगेन्द्रः स ओंकारम्॥

84.

पूर्वत एव वनमिदं
स्वस्थं स्वस्थाश्च वन्यपशव इमे।
शासति विवेकविहगे
स्वस्थतमा दधति ताटस्थ्यम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

85.

एवं विवेकशक्त्या
मरालकुलनायकस्य धवलस्य।
सर्वं धवलीकृतमिह
विभाति मानससरसि सतटे ॥

86.

अधवलमञ्जनसुहितं
रक्तं सीमन्तशोभि भगवत्याः।
वीणापाणेः सर्वं
धवलं वसनं धवलमन्तः ॥

87.

एवं धवलतनुरयं
धवलमना धवलसंस्कृतिविवेकः।
शिवसत्यसुन्दरमयो
व्यधात् समेभ्यः समं भव्यम् ॥

88.

अत्र समेषां सुलभं
सर्वं पोष्यं तनोश्च सत्त्वस्य।
न मनोरथो ऽत्र कश्चिद्
भग्नो भूमौ निमग्नो वा ॥

89.

पुरुषार्था हि कृतार्थाः
परमे व्योमनि रमन्त एव समे।
नाभावः कोऽप्यन्यो
भेदाभावो ऽत्र साम्यमयः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

90.

प्रेमा नियतः सहजः
स्वयं लुनीते समस्तखण्डधियः।
नियतेः सौन्दर्यधियं
सर्वैः सम्भूय पुष्णाति।

91.

प्रेमाऽनङ्गीभावं
गमितस्त्रिनयनतपोमहिमकलया।
विश्वं युनक्ति निखिलं
शिवसौन्दर्यात्मसत्यधिया॥

92.

को मोहः कः शोकः
श्रीशारदयोः समन्विते सदने।
नाभावः सम्पत्ते-
र्नापि विवेकस्य यत्र पलम्॥

93.

यत्रैव विहगराजो
विवेकधिषणो विराजते द्विजराट्।
एधन्ते सद्भावा
भवत्यभावस्य चाभावः॥

94.

सर्वेषामस्ति समो
भागः सम्पत्सु तत्र निखिलासु।
यस्य यथा यत् पात्रं
तत् सर्वं सर्वदा पूर्णम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

95.

मानसदूषणदुरिता-
भिध्याः सर्वाः पलायिताः क्वापि।
द्विदलदुरभिसन्धिधियां
क्वावसरोऽपि प्रवेशाय॥

96.

श्रद्धां वा विश्वासं
तर्कधियं वा ऽन्न कस्यचित् कश्चित्।
हन्ति न, सर्वः सर्वं
भजति च वेत्ति च बिभर्त्ति मिथः॥

97.

इत्थं धवलविवेके
सिद्धे शुद्धे द्विजे तदेकस्मिन्।
सर एव शिवं निखिलं
सत्यं सुन्दरमभूद्विमलम्॥

98.

अध्यात्मचिन्तनमिह
प्रथमा ऽभूदन्तिमा च चिन्तैषाम्।
निश्चिन्तानां सदने
बहिश्च पूर्णप्रकामाणाम्॥

99.

सहजा जीवनवनिका
सहजाः सुमनस इमाश्च सामोदाः।
सहजः प्रेमा परितः
कृत्रिमतायाः कुतोऽवसाः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

100.

जयति स विवेकविहगो
जयति सरो मानसं च नव्यमिदम्।
जयति स वीणातानो
जयति विधेः सर्गसौन्दर्यम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नूतनं जीवनम्

नूतनं जीवनं नूतना भारती
नूतनं मङ्गलं सम्पदो नूतनाः।
नूतनं संस्कृतं नूतना संस्कृति –
र्नूतने वत्सरे भातु भा नूतना ॥1

मूलवक्त्रेण सम्प्रापयञ्जीवनं
जीवनानोकहः सर्वतो वर्धताम्।
जीर्णता नूत्नता पर्णमात्राधृता
पूर्णतामेव पुष्णातु नैसर्गिकीम् ॥2

पूर्णतायां न किञ्चिन्नवीनं न वा
वर्त्ततेऽस्यां पुराणं कदाचित् क्वचित्।
याति कश्चित् प्रवाहः समायाति वा
तत्र नो प्रत्नता–नूत्नता–भेदधीः ॥3

वर्त्तमानाः प्रवाहा इमे नूतना
निर्झरा भूधरेन्द्रस्य भूता अमी।
सन्ति भव्यास्तरङ्गा महाम्भोनिधे–
र्नौमि गाङ्गेऽ त्र कालत्रयं जीवने ॥4

नैव किञ्चित् पुराणं सदा संसृतौ
नैव किञ्चिन्नवीनं सदा संसृतौ।
अद्य चन्नूतनं, श्वः पुराण हि तद्
वस्तुतो द्वे अपि स्तः प्रभे संसृतेः ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पश्यतादायतिं नेत्रमेकं पुरो
नेत्रमन्यद् भुवो मृत्तिकां पश्यतात्।
तत् तृतीयं स्वमूलं सदा वीक्षताम्
एवमासेव्यतां साधु कालत्रयम् ।।6

पाद एकः स्थिरः स्याद् धरायां क्षणं
यातु चाग्रे पुनः साधु पादोऽपरः।
पृष्ठतः पातु शैली पुराणी शुभा
पातु चाग्रे गतिं काऽपि शैली नवा ।।7

एवमाभातु कालत्रयं जीवने
जीर्णतायां दधन्नूतनं सन्ततम्।
नूत्नतायां दधत् प्रत्नताः शर्मदाः
पश्यतादायतौ तामनन्तां प्रभाम् ।।8

जायमानः पुराणः पुनर्नूतनः
सुन्दरः सर्गसञ्चक्रमो जङ्गमः।
सङ्गमान्नित्यनूत्नान् दधातु स्वयं
धायकानेधकान् मङ्गलामोदकान् ।।9

एकमेवाचलं सर्वगं सर्वदा-
नूतनं सर्वदा तत् पुराणोत्तमम्।
सर्वमन्यच्चलं तेन सञ्चालितं
नित्यमेवाप्तुकामं तदेवास्थिरम्। ।।10

एकमेवास्त्यनेकीकृतं लीलया
नित्यनूत्नं पुराणीभवत् खेलति।
युष्मदस्मत्प्रतीतिप्रभावात्मको
मञ्च एषोऽस्ति नानारसाधायकः ।।11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र सर्वे रसा नित्यनूत्ना इमे
श्लोकगीतानि निर्मान्ति शोकाक्षरैः।
स्वादु मिष्टं च निर्माति धात्री मुखे
ऽम्लैश्च तिक्तैर्धृता शारदी सर्वदा ॥12

अत्र पङ्कात् प्रसूनोद्गमः सुन्दरः
कृष्णपक्षा च राकां प्रसूते कुहूः।
काऽप्यपर्णा प्रसूः पर्णसर्गश्रियां
नूतनेयं पुराणी कथा संसृतेः ॥13

उर्वरीभावमाप्नोति भूमिर्मलैः
सत्यमाप्नोत्यसत्यैर्जनः प्राकृतैः।
मृत्युरेवामृतत्वस्य सन्देशकः
संशयाम्भोनिधिर्ज्ञानरत्नाकरः ॥14

एवमेते विरोधाः सहायाः सृते-
र्वह्निरेवास्ति हेमन्तसंरक्षकः।
शीतलोऽयं निदाघे समीरः सखा
गौरवं लाघवे पूर्णताऽऽधायकम् ॥15

सर्व एते विरोधा नवे वत्सरे
नूतनं धारयन्त्वानुगुण्यं महत्।
आनुकूल्यं समस्ताः सुवाता दिशः
सर्वतः सर्वदैता भजन्त्वेव नः ॥16

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वगतं सहजतायाः

भग्ना दन्ता एते
न प्रकृता अपि तु कृत्रिमाः सर्वे।
शोकैरलं मनस्विन्
न सौरभं तूलकुसुमेषु ॥1

कनकं वा कुसुमं वा
वाणी वा व्यवहृतिर्बहिर्वान्तः।
सहजा एव नमस्या
न कृत्रिमा जातु कुत्रापि ॥2

प्रकृतिरविकृता विकृती-
रपि सहजा एव जनयति क्षुभिता।
आपञ्चभूतसर्गात्
प्राकृतमेवास्ति जगदखिलम ॥3

कथमिह कदा समायात्
कृत्रिमता मानवे महति सर्गे।
क्षुरधारा मनसि शिता
वचीस सिता धीयते मधुरा ॥4

सहजकटुर्माधुर्ये
कृत्रिममधुरं नितान्तमतिशेते।
जानन्तोऽपि वयमिदं
सदैव कृत्रिमसितां प्रणुमः ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्तरसिता सिता सा –
ऽन्तर्गरला स्वादुतां प्रदर्शयते।
कर्णौ पिधेहि तूर्णं
मा विशदन्तःकरणमेषा ॥6

तूष्णीमन्तः प्रविशति
चारुचमत्कारधारिणी दुरिता।
गीरसतां सद्वेषा
शनैः शनैर्दहति चात्मानम् ॥7

सरसा हरिताः सर्षप –
तिलयवगोधूममुद्गसन्तानाः।
नागरिकाणां नादर-
भाजोऽद्यत्वे सहजसुषमाः ॥8

हरितसरससरसीरुह –
वनी वृता नीरसैरयःकनकैः।
निगृहीतेव जनकजा
दुनाति नः सन्ततं चेतः ॥9

वागाडम्बररसिका
अन्तःकलुषं पिधाय सुवचोभिः।
लुण्ठन्ति यशः कनकं
लोकात् साम्राज्यमपि कुधियः ॥10

रामो रामः शुद्धः
पुराऽभवद् रावणोऽप्यसम्मिश्रः।
अद्य तु रावणवर्गो-
ऽतिशेत इह राममपि वचसा ॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रामीभूय सुवचसा
लुण्ठति शास्त्रं धनं यशश्च भुवः।
स्रग्विनिमयैः परस्पर-
मारचयति विक्रियास्त्राणि ॥12

केचन रटिताः शब्दाः
केभ्यश्चिद् ग्रन्थरत्नपृष्ठेभ्यः।
तैः शब्दैरेव महा-
विद्वांसस्ते जयन्ति सर्वत्र ॥13

शब्दक्रीडामात्रं
लीलाः सर्वा सुकृत्रिमाधाराः।
क्रीडन्ति तत्र मञ्चे
नेतारश्चाभिनेतारः ॥14

कृत्रिमवेषाः कृत्रिम-
वासाः कृत्रिममुखा इमे प्रमुखाः।
शिवसत्यरम्यतास्ताः-
सृष्टेर्निघ्नन्ति निष्करुणम् ॥15

वीणापाणिर्विलपति
विवेकविहगो न वर्त्तते सुलभः।
मानसमाविलमेतद्
वीणा निर्झङ्कृतिः स्वपिति ॥16

वीणा निर्लयताना
निर्भावरसा च भारती शेते।
द्विजवरविवेकवाहन-
सापेक्षे किमधुना कुरुताम् ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहजा मानसजीवन-
गतिरमलोल्लासगीतलयताना।
अधुना पाठीनधनै-
र्निहन्यते हन्त सितवेषैः ॥18

चञ्चूभिर्दीर्घाभि-
र्मानसमखिलं त एव सेवन्ते
धातारस्त्रातार-
स्त एव सुमनोनिधेरधुना ॥19

सुमनस इमा इदानी
वृताः कुमनसां दलै र्विविधरूपैः।
रविकरनिकरा इव दिवि
किरन्ति सुषमां न घनपिहिताः ॥20

मृदुता किमिति विधात-
र्व्यधायि भवता सुदुर्बला जगति।
महिषवराहवकैः सा
निर्दयमुत्पीड्यते सततम् ॥21

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रेमा

गतमागतं च विवशं
    कियदवधि पुनः पुनः प्रवृत्तं स्यात्।
को वेत्ति कश्च रोद्धुं
    शक्तः कालस्थ वेगमिमम् ॥1

याति स आयाति पुनः
    पुनः प्रयात्येव विस्मरन्नखिलम्।
गत्यागती अनित्ये
    गन्ताऽऽगन्ता सदा नित्यः ॥2

नतरामेषु विवादे–
    ष्वतिरमतां नित्यनित्यभिन्नेषु।
भेदा एवानित्या
    नानित्यं किञ्चिदपि तत्त्वम् ॥3

जहिहि विवादानेतान्
    रमस्व सौन्दर्यशालिनि प्रेम्णि।
प्रेमा हि सत्यमेकं
    शिवं स एव स हि सुन्दरं तत्त्वम् ॥4

त्यज धर्मशास्त्रवार्त्ता-
    स्त्यज वार्त्ता मोक्षशास्त्रवादानाम्
साधय परमाद्वैतं
    प्रेमाणं द्वैतदीर्घदृढम् ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भस्मन एवाङ्गानां
प्रणयोऽपर्णाश्रितः शिवीभवति।
द्वैतं तदैव सद्यो
ऽद्वैतीभावं समुपयाति ॥6

नाहं प्रणयाद्वैतात्
परतरमीक्षे कुतश्चिदद्वैतम्।
जयति प्रणयाद्वैतं
शान्तिं सर्वत्र कल्पयतात् ॥7

सिध्यति नैवाद्वैतं
द्वैतविशुद्धिं विना क्वचित् परमम्।
"सह ना" ववति परेशो
न तु मामेकलमतः सदयम् ॥8

नयने द्वे नयनाभ्यां
द्वाभ्यां सम्मूय भजत एकत्वम्।
द्वे द्वे नो चत्वारो
हृद्गुणिते सन्ति तान्येकम् ॥9

एकमनेकेष्वस्ति
स्वस्त्येकस्मिन्ननेकमपि तद्वत्।
वेद्मि न भेदः क्वास्ते
कीदृगनेकैकयोः कस्मात् ॥10

अत एव शास्ति गीता
पश्यात्मानं समस्तभूतेषु।
पश्य तथा तान्यात्मनि
भावय विश्वं निखिलमेकम् ॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावित एवैकस्मिन्
सत्ये सर्वं स्वयं भवति सत्यम्
साधितसत्यसुबुद्धे-
रसत्यमपि सत्यमेव समम् ॥12

अप्यस्ति काऽपि माया
सत्याधारा भवेन्न या क्वपि।
क्व वर्त्तते तद् द्वैतं
यन्नाद्वैताश्रयं स्यान्नु ॥13

व्यर्था इमे विवादा
द्वैताद्वैतादिवादभेदधियः।
आदावन्तेऽद्वैतं
मध्ये द्वैतं परिस्फुरति ॥14

विद्याऽविद्ये श्रद्धा-
तर्कौ भुक्तिश्च मुक्तिकैवल्यम्।
सम्भूय संर्वभेतत्
समुपास्यं सक्रमं सर्वैः ॥15

प्रणयाद्वैतं साधय
सिद्धे तस्मिन् किमस्त्यसिद्धं ते।
सर्वमसिद्धमपूर्णं
यदि तत् सिद्धं न ते सम्यक् ॥16

जगदिदमखिलं रम्यं
सचन्द्रतारकसरित्समुद्रवनम्।
हृद्गणितं यदि शुद्धं
प्रणयसमीकृतिविधानैस्तैः ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रविभक्तमप्यनेकै –
रेकस्थमिद्र जगन्निखिलमेकम्।
प्रणयदृशैव समेतं
दिग्भिः कालैः समैर्दृश्यम् ।।18

दिशतु दृशं तां भगवान्
प्रणयसुधाक्तां भुवि प्रसादमयीम्।
काऽन्या सम्पदनुपमां
तामतिशेतां स्वयम्पूर्णाम् ।।19

कुम्भोऽपूर्णः कुरुते
कोलाहलमति धृतोऽपि शिरसि दृढम्।
पूर्णः स शान्तिमौनं
भजते करतलगृहीतोऽपि ।।20

जीवनमिदमपि पूर्णं
प्रणयमयं न बहुमानमितरत्र।
मौनं शान्तं पश्यति
शोभां प्रणतं प्रणयरसिकम् ।।21

न तमःप्रकाशभेदो
नाविद्या बाधिका च विद्यायाः।
शैवं सत्यं सुन्दर–
मखिलं पूर्णं प्रणयसदने ।।22

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उच्चैःश्रवाः

उच्चैःश्रवा अस्मि शृणोमि सर्वं
ह्युच्चैर्यथा नैव शृणोमि किञ्चित्।
परोऽस्ति मे धावनमेव धर्मः
किं वा वदेयं शृणुयामहं किम्॥1

वदामि चेन्नेव शृणोति कश्चि-
च्छृणोमि चेन्मोहमहं भजामि।
अतः सुविस्मृत्य गिरां विवादं
धावामि धावामि पथि स्वकीये॥2

समाद्रियेऽहं श्रवणं च गीतं
गिरां समासां भुवि विस्तृतानाम्।
प्रत्यक्षरं सन्निहिताँश्च देवान्
सरस्वतीं चापि नमामि वन्द्याम्॥3

परा तु गीः सन्ततमेव सत्या
शिवा च रम्या सुविनिश्चितार्थां।
तथापि सा कृत्रिमभावनैर्वै-
खरत्वमानीयत मानवैस्तैः॥4

सितं त उच्चैरसितं वदन्ति
तमश्च शुक्लं प्रलपन्ति भूयः।
परां विशुद्धां परिदूष्य मध्ये
निरर्गलं ते विकिरन्ति वादान्॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न धाव, तूष्णीमुपविश्य भुङ्क्ष्व
कृतं श्रमैः स्वेदविनिर्गमैस्तैः।
इत्याम्हुरेतेषु महत्तरास्ते
भाग्यं फलत्येव न तत्र शङ्का ।।6

धावैव भुव्येव चयार्थमेव
पदप्रतिष्ठाकनकोच्चयानाम्
तृणाय मन्यस्व पथोत्पथादि–
क्रमव्यवस्थां स्वधनैकलक्ष्यः ।।7

कृतं फलावाप्तिधिया महेन्द्रा-
र्पितस्वसर्वस्व इहामुतश्च ।
प्रधाव धावैव पथि स्वकीये
स्वभावधर्मारचिते सदैव ।।8

एवंविधानेकविवादवादै-
रनेकदिग्देशफलैरमीभिः ।
कर्णौ ममास्तां तुदितौ प्रगाढं
ततः पर तौ पिहितौ मयैव ।।9

मया स्वयं स्वेन रहः सुमन्त्र्य
पथः सुनिर्धार्य निजान् सुभक्तान्।
स्वचक्षुषाऽऽलोच्य दिशोऽनुकूलाः
प्रवर्त्तिता धावनवृत्तिरेषा ।।10

केनापि वादेन न मे विरोधो
वादाः समेऽमी मम पूजनीयाः ।
स्वधर्म आस्ते नहि जातु हेयो
धर्मोऽस्ति मे धावनमेव सिद्धः ।।11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धावाम्यनन्ते फलनिःस्पृहोऽहं
धावामि सान्ते श्रमवेतनार्थी।
दिवि क्वचिन्मे भुवि विक्रमं स्वं
प्रवर्त्तयाम्येवमनारतं भोः ॥12

दिव्याः समाः सन्ति समेऽत्र मार्गा
भौमाः समे मे विषमा भवन्ति।
दधे सदा धावनकौशलं तन्
न जातु खिद्ये विषमे समे वा ॥13

उच्चैःश्रवा दीर्घसुदर्शनोऽहं
धावामि धावामि पुरश्च पश्चात्।
ऊर्ध्वं तथाऽधः सकलासु दिक्षु
बहिस्तथान्तः प्रचलामि यामि ॥14

ब्रुवन्तु ते यत् किमपि, स्तुवन्तु
निन्दन्तु वा घ्नन्तु समेधयन्तु।
उच्चैःश्रवा नैव शृणोमि किञ्चिद्
व्रजामि धावामि पथि स्वकीये ॥15

धावामि शान्तौ च तथैव युद्धे
यथेश्वरादेशमितस्ततो वा।
बिभेमि नो दानवसंघघाताद्
यत्रेश्वरस्तत्र ममाभियानम् ॥16

करे महेन्द्रस्य ममास्ति रश्मि-
र्दिशां स एवास्ति नियामको मे।
ममास्ति भो धावनमेव धर्मः
प्रयामि धावामि यथातदिच्छम् ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न दीनता काचिदहङ्कृतिर्नो
लिप्सा महत्त्वेप्सितमस्ति नो मे।
नेर्ष्या न वा द्वेषमतिः कुतोऽपि
धावाम्यविश्रान्त इतस्ततश्च ॥18

एवं महेन्द्रधृतरश्मिरहं स्वतन्त्रः
स्वे मार्ग एव विहराम्यभयो विशोकः।
धर्मः स्व एव मम चात्र गतिः स्वकीया
सोच्चैःश्रवा अहमितश्च ततो व्रजामि ॥19

अतिध्वनिश्चातिमना अतीच्छो-
ऽतिभावनश्चातिमतिः सभक्तिः।
धावाम्यहं विस्मृतविश्रमस्वः
स्वस्थः स्वयं स्वां गतिमेव पश्यन् ॥20

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वयं प्रदाह्य

स्वयं प्रदाह्य सद्म हे मनोस्तनूज रोदिषि
विलक्षणा तवास्ति सर्वमोहिनी मनीषिका।
"इमे समेऽरयः समेत्य सद्म मेऽदहन्निति"
प्रभूतवाग्विसर्जनैर्जनान् प्रबोधयस्यपि ।।1

स्वयं किरस्यहर्निशं तु कण्टकानि वीथिषु
स्वयं प्रयासि तत्र वीक्षितुं व्यथां च यात्रिणाम्।
व्यथा तवैव किन्तु पूर्वमेव तत्र दृश्यते
दहँस्त्वमेव पूर्वतः परानधिक्षिपस्यपि ।।2

स्वयं वपस्यहर्निशं विषाणि सर्वतः सखे
स्वयं च मञ्चतो ब्रवीषि तत्कथाः पुनः पुनः।
निदानमप्यसि स्वयं स्वयं च रोगलक्षणं
स्वयं चिकित्सितं स्वयं समोऽसमो ऽथवा स्वयम्।।3

स्वयं समुच्छिनत्सि काननानि हर्म्यभावनो
निहंसि हन्त सुन्दराणि जङ्गमानि चानिशम्।
स्वयं चराचरं प्रदूष्य जीवनं जगच्च भोः
स्वयं रुदन् व्यथाकथास्तनोषि सर्वतः सखे ।।4

विलक्षणेयमस्ति ते प्रवृतिरत्र मायिकी-
ऋजुः कथं क्वचिन्न ते गतिः प्रकाशवत् सखे।
धनैषणाः पदैषणा मदैषणाश्च बिभ्रतः
कथं न ते हृदि क्वचित् सुखैषणा समेधते ।।5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुखं विसृज्य शाश्वतं निसर्गसर्गसुन्दरं
मुहुर्मुहुः प्रधावसि प्रतप्तलौहसद्मसु।
पिपासितोऽपि जाह्नवीं दिदृक्षसेऽपि नो सखे
मरीचिकासु पांशुलः समीप्ससीह जीवनम् ॥6

स्वयं श्लथीकरोषि पावनानि बन्धनानि ता-
न्यहो स्वतन्त्रतां प्रचारयन्नहर्निशं सखे।
ततः परं चिकित्सकं क्षयार्दितो गवेषयन्
न लज्जसे मुमूर्षुरत्र तत्र धावने रतः ॥7

अहङ्कृतेर्निपीय वारुणीं मुहुर्मुहुः सखे
भ्रमस्यहर्दिवं पतस्यनुक्षणं रसातले।
रसस्तु जीवनस्य विस्मृतस्त्वया मदात्मना
निपातलग्नपङ्कजालमेव लेक्षि सन्ततम् ॥8

क्षितौ वपस्यहर्निशं विषद्रुमान् स्वघातकान्
दिवि स्वयं तनोषि धूमजालमेव मारकम्।
प्रदूषयस्यपां निधीन् गिरीन् वनानि चापगाः
कथा विलक्षणाऽस्ति ते पुनः पुनर्नमोऽस्तु ते ॥9

सदैव तत्त्वविद्गणः सुखं तवानुशंसति
यथा यथाऽनुशास्त्यसौ सुखं, तथैधते विपत्।
त्वमेव कारणं च लक्षण च सर्वसम्पदां
त्वमेव दुःखकारणं त्वमेव दुःखलक्षणम् ॥10

मुधा प्रधावसि प्रतोलिकासु तिर्यगीक्षणे
रतोऽन्यसद्मनां स्वसद्म विस्मरन् मुहुर्मुहुः।
चिनोषि लोष्ठकानि, रत्नमालिकास्तु पल्वले
क्षिपस्यहर्निशं विदन्नपि द्वयोस्त्वमन्तरम् ॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न वेद्मि किं तवेप्सितं मनोस्तनूज साम्प्रतं
स्वमङ्गमेव सन्ततं लुनासि तैः कुठारकैः।
विभाजनं पदोः स्वमस्तकात् किमस्ति साभ्प्रतं
विभक्तिरात्भनस्तनोः किमस्ति ते मता मतेः ।।12

न वेत्सि नो किमस्ति साभ्प्रतं किमस्त्यसाभ्प्रतं
न वेत्सि नो किमस्ति शाश्वतं किमस्त्यशाश्वतम्।
प्रवर्त्तसे तथाप्यसाम्प्रतेष्वशाश्वतेषु च
भ्रमोऽयमस्ति कीदृशः प्रियस्तवारिनन्दनः ।।13

स्वयं भिनत्सि भाजनानि तानि येषु भोजनं
करोषि निष्प्रयोजनानि तत्क्षणादिति ब्रुवन्।
न भाजनानि सन्ति, भोजनं कुतौ विधीयता–
मधिक्षिपस्यहो परेद्यवि स्वयं सखीन् रुदन्।।14

न वेद्मि किं तवेप्सितं तवास्ति किं चिकीर्षित
तवास्ति किं निधित्सितं तवास्ति किं पिधित्सितम्।
रहस्यमस्ति किं सखे तवाथवा तवेदृशां
व्यथाकथाभृतां विधानतानमानकर्मणाम्।।15

सदैव रोदिषि त्वमन्यपुण्यकीर्त्तिकीर्त्तनात्
तवाधरे स्मितं सुदर्शमन्यपापकीर्त्तने।
तव स्मितं च रोदनं च वीक्ष्य किं द्वय न्वंह
सुविस्मितो निसर्गभावनाक्रमं न भावये।।16

रसालतालशालमुष्ककका इमे सहायकाः
पतत्रिणां गवां च हस्तिनां शुनां नृणां तथा।
किमर्थमेष मानवस्त्त्वमागतोऽत्र भूतले
निहन्तुमेव किं समस्तरामणीयकं मुधा।।17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निहंसि रामणीयकं हसन् सुखं प्रकल्पयन्
पुनर्विरौषि दुःखभाक् कथं मया हतं सुखम्।
सदेव हन्यते यदि स्वमात्रपुष्टये स्वतः
कथं समस्तभूतलस्य लप्स्यते सुखं त्वया ॥18

विडम्बनेयमेव सर्वदा मरीचिकाः स्वयं
दधासि, जाहवीं प्रदूषयस्यहो निरन्तरम।
ततश्च रोदिषि स्वयं क्व लभ्यतां सुजीवनं
सुजीवनं हतं त्वया त्यजैव जीवनैषणाम् ॥19

दिवश्च्युतः समागतोऽसि मेदिनीं मनोः सुत
क्व गंस्यते त्वयेति विस्मृतं त्वया समं स्वयम्।
स्मरैव किन्त्विमां कथां निवास एष नास्ति ते
सनातनः, सनातनः स्वयं भवान् महाशयः ॥20

सनातनोऽसि मा स्म भूः कृतघ्नतापरः सखे
न मन्यतामुदारभावनां कदाचिदन्यथा।
सहायको न जीवने ऽस्ति कोऽपि तेऽपमानभांग्
इति त्वया स्मृतौ सुधेयमाशरीरमोक्षणात् ॥21

समस्तमस्ति ते निजं गृहं वसुन्धरातलं
प्रसन्नता यदि त्वदात्मनि प्रभां तनोति ताम्।
यदि त्वमेव खण्डभावनो धनेषु सस्पृह-
स्त्वमेकलोऽसि खण्डितो ऽशिवं तवास्ति केवलम् ॥22

निसर्गसुन्दरः सनातनो विभुर्महाशयः
स्वयं त्वभेव विस्मरस्यनात्मसेवकः स्वताम्।
मरीचिकासु जीवनं गवेषयन्ननारतं
सुनिर्मलं स्वमूर्ध्नि गाङ्गजीवनं न पश्यसि ॥23

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशालतां तवात्मनः समे समामनन्ति भो
बुधाः क्व किन्तु सा सुदुर्गमा त्वयाऽस्ति गोपिता।
असौ क्वचिन्न लभ्यते त्वयि प्रचण्डखण्डने
प्रचण्डतुण्डमण्डले प्रखण्डनैकमुण्डने ॥24

अखण्डमात्मनः क्रमं निसर्गजं न वेत्सि किं
तरुः सपत्रपुष्पकण्टशाख एष एधते।
त्रयो गुणास्त्रयश्च धातवो मिथो विरोधिनः
सहैव सर्वदा निसर्गतो वसन्ति जाग्रतः॥25

न वेत्सि नान्तरं मरीचिकासरित्प्रवाहयो-
स्तयाप्यनारतं पिपाससि द्रुतं मरीचिकाम्।
उपेक्षसे प्रदूषयस्यहर्दिवं सरिज्जलं
तवेयमस्ति कीदृशी विलक्षणा बहुज्ञता॥26

न मृष्यसे मृणालमार्दवं सरोजरम्यतां
मुधा चिनोषि कर्कशानि लौहपिण्डकानि भोः।
कथं वशंवदोऽसि हे मनोस्तनूज चर्मणां
विकर्मणां विशर्मणां विवर्मणां विमर्मणाम्॥27

विसर्जनीयमुत्करे दधासि वस्तु मूर्धनि
किरीटरत्नमुत्करे क्षिपस्यहो महामते।
पशूत्तमो भवाँस्तवैव पञ्च तन्त्रयुत्तयः
किमामनन्ति ता हिताय ते त्वमेव वेत्सिं तत्॥28

अरण्यवासिनः पशोः क्व सन्ति तन्त्रयुक्तयः
समाग्निरेष सन्ततं समात्मधातुसत्क्रियः।
कदापि भाषते मृषा न, नापि सञ्चयेऽस्य धीः
प्रवर्त्तते कदापि, सैष वर्धते सुखं वनें॥29

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दधत्तु तन्त्रयुक्तिमालिकाः समा मुखे भवान्
मनोस्तनूज किं दधाति तत्त्वमन्तरात्मनि।
यदाशरीरमोक्षणात् प्रधावने रतोऽनिशं
कदापि धातुसाम्यमत्र नाप्नुते न वा सुखम् ।।30

प्रशस्तिगानदक्षतां दधद् बहिर्महात्मनां
ज्वलन्ननन्तमानरोषभावनाभिरन्ततः।
बहिस्त्वमन्य एव चान्तरन्य एव सन्ततं
द्विधा कथं तवास्ति जीवनं विभक्तमेकलम् ।।31

पुराऽभवत् किमद्य किं भविष्यति श्व इत्यथ
त्वमस्यनारतं सुबद्ध एभिरेव बन्धनैः।
कथं न ते ऽद्य काल एव सन्ततं सुनिश्चितः
फलेग्रहिर्मनोरमो भवत्यभीप्सितप्रदः ।।32

दये तवावलोक्य दुर्दशां स्वयङ्कृतां मनो-
स्तनूज विस्तृतामिमां स्वविस्तृतिव्रताधृताम्।
किमस्ति ते बहिर्यदुन्नतिं सदाभिवाञ्छसि
तवान्तरेव ते तदुन्नतौ तवोन्नतिर्धृता ।।33

न विस्मरोन्नतिं निजां निजात्मविस्तृतिव्रतां
निजात्भविस्तृतिर्निसर्गवाञ्छिताऽस्ति विस्तृतिः।
निसर्गवाञ्छितं न वेत्सि नो मनोस्तूनजक
दधासि मेखलां स्वमूर्ध्नि कर्णपूरकं कटौ ।।34

त्वमेव सर्वतोऽसि सत्यमेतदेव शाश्वतं
न किन्तु युष्मदर्थवाच्यता तनौ न वा बहिः।
त्वमन्तरात्मवाच्यनित्यशुद्धबुद्धमुक्तक-
स्त्वमेधि सर्वतो जयी समे त एव बन्धवः ।।35

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न वेद्मि भूमिरेव वर्त्तते मही न किं युगे-
ऽधुना विभाजिताऽस्ति सा लघुर्लघुर्लघीयसी।
विवादजातमद्य भूमिभागलाभसंयतं
क्व वीक्ष्यतां कुटुम्बकं कुतोऽपि भूतले सखे ।।36

विभाजनं समीक्ष्य सद्मनां भुवां गवां श्रियां
समस्तभूतले लभे न मङ्गलं न मण्डनम्।
यतो व्रजामि खण्डनानि केवलं लभे ततः
स्वयं भवामि खण्डितो लभेय क्कुत्र मण्डनम् ।।37

स्वतन्त्रता न खण्डनाश्रिताऽञ्जसा कदाचन
भ्रमोऽयमस्ति किन्तु विश्वभेदको महाम्लकः।
स्वतन्त्रतार्थमिष्यते पृथक् स्थिति र्निजा निजा
न सा स्वतन्त्रता पुनः श्वतन्त्रतैव सा मता ।।38

सुनिन्दनानि सन्ति मोदकानि ते त्वनारतं
न पश्यसि स्वमन्तरात्मना स्वयं निगूहयन्।
महाशयस्त्वमेक एव किं सखे सुनिन्दकः(
समेऽपरे किमत्र सन्ति निन्दनीयसत्त्वकाः ।।39

इदं तु सत्यमेव विश्वसम्मितो महान् भवान्
महत्तरो महत्तमः समावृतोऽत्र पञ्चकैः।
स्वमेव किन्त्वहङ्कृतिप्रधानमस्ति ते लघु
स्वके पदे निवेशितं निरीक्षते समं लघु ।।40

सुलाघवं तदीयमेव सर्वदा मनोः सुत
पृथक्करोति सद्म ते ऽन्यसद्मनो विभेदभृत्।
विहाय विश्वनीडमेतदात्मरम्यताऽऽलयं
विशालमाम्रकाननं बिलेऽल्पके निलीयसे ।।41

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बिलेऽल्पके भुजङ्गमा वसन्तु मूषकार्थिनो
विषं च चिन्वतां जिघांसवः समस्तभूतलम्।
भवान् विरिञ्चिना विनिर्मितः सुरक्षको भुवो
दधाति किं भुजङ्गमव्रतं स्वयं सुबुद्धिमान्॥42

न किञ्चिदाप्स्यते त्वया फलं बिलेऽत्र शाश्वतं
न पावनः समीरणो ऽत्र नो रविर्न वा विधुः।
बिलाद् बहिः समेत्य पश्य काननं च जाह्नवीं
प्रभां दिवाकरस्य शक्तिमत्तमां च भूतले॥43

मनोस्तनूज धातुरुत्तमोत्तमो भवान् निधिः
किमस्ति तद्यदत्र तत्र वा तवास्ति दुर्लभम्।
स्वमेव ते प्रसारितं भवेत् समस्तसाधकं
तदेव चेल्लधूकृतं भवेत् समस्तबाधकम्॥44

यदस्ति ते महल्लधूकरोषि तत् स्वयं मुधा
महत्तमीचिकीर्षसि स्वयं त्वहङ्कृतिं लधुम्।
विपर्ययोऽयमेव ते समस्तसिद्धिबाधको
निसर्गजः समन्वयः समस्तसिद्धिसाधकः॥45

जहीहि तं विपर्ययं सुकृत्रिमं सुविभ्रमं
निसर्गजं महत्तमं स्मरैव सर्वदा निजम्।
निसर्गजस्त्वमेक एव सर्वमेव मायिकं
समस्तमन्यतात्मकं ततो भवेदितो ऽथवा॥46

मुधा भ्रमस्यहर्दिवं मनोस्तनूज तेषु ते–
ष्वपास्य सुन्दरं शिवं स्वरूपमद्वितीयकम्।
सकृत् सुपश्य तत्त्वमद्य साम्प्रतं चिदात्मकं
त्वमेव सर्वतः समे त्वयि स्थितास्त्वमेधि तत्॥47

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कथं स्वयं त्वमेषु कृत्रिमेषु सन्ततं रतः
सुबन्धकेषु मायिकेषु विस्मरन् स्वमेव तत्।
स्मर स्वमेव सत्वरं सुमोक्ष्यसे कुबन्धनात्
स्वनीरधौ यथा झषः सुजीव सर्वदोच्छलन्॥48

स्मृतिं च विस्मृतिं यथोचितं प्रयुङ्क्ष्व जीवने
स्मरात्मरूपमाततं समस्तविश्वमण्डनम्।
इमानि विश्वरूपखण्डनानि विस्मर स्वयं
समेधि विश्वमण्डनो न जातु विश्वखण्डनः॥49

विषद्रुमानिमान् विहाय मारकान् मनोहरान्
रमस्व सच्चिदात्मके ऽमृतद्रुमालये ऽधुना।
अलं मनोजकाञ्चनभ्रमैरलं स्वखेदनैः
स्वयं स्वरूप एव विश्वसन्तते सुरम्यताम्॥50

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

याम्यहम्

याम्यहं सर्वदा किन्तु जाने न किं
लक्ष्यमस्ति क्व गन्तव्यमन्त्यं मम।
मां नुदत्येष भोः सर्वदा पृष्ठतः
कोऽप्यमूर्त्तः किमप्यब्रुवन् सर्वगः ॥1

एष नो मां जहाति क्षणं पृष्ठतः
कर्णयोराह किञ्चिन्न चातिस्फुटम्।
प्रग्रहीतुं यते तं यदैवाकुलः
सोऽपयाति क्वचिद् भ्रामयन् मां हसन् ॥2

तस्य कोऽनुग्रहैर्विग्रहैर्मादृशा-
मर्थ इत्यप्यबुद्धं बुधानामपि।
कर्म किं कर्त्तुमर्हः क्व चित्तं विना
कोऽपि जाग्रत् सुषुप्तोऽथवा स्वप्निलः ॥3

किन्तु सत्यं न्विदं सैष मां नित्यशः
क्रीडयन् हासयन् रोदयन् मोदते।
एक एवास्त्यसौ यो ददात्येव मे
नैव गृह्णन् किमप्यंशतोऽपि क्वचित् ॥4

तस्य किं वाञ्छितं कोऽपि जानाति नो
सैष एकः स्वतन्त्रोऽस्ति कर्त्ता प्रभुः।
कर्म किञ्चिन्न तस्मिन् द्वितीया कुतः
सन्नताऽस्मै चतुर्थी निवेद्याऽस्ति मे ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किं यथाऽसो सदा मां नुदत्यग्रतः
पृष्ठतश्चोर्ध्वतः किं तथा नेतरान्।
अन्यथा दुर्जनाः स्युः कथं मण्डिताः
पण्डिताश्चानिशं स्युः कथं खण्डिताः ॥6

मण्डनं किं खलानां तथा खण्डनं
पण्डितानां सदैवानुवर्त्तिष्यते।
कः कथं तं क्रमं मानवो दानवो
निर्जरो वा कदा रोत्स्यते वेद्मि नो ॥7

प्रेरकोऽसौ सहायोत्तमः किं न मां
शास्ति किञ्चिन्मया किं विधेयं न वा।
मादृशां मौनमेवास्ति किं वाञ्छितं
तस्य पाखण्डवादाकुले भूतले ॥8

मौनमेवाश्रितः कौशिकः क्ष्वेडितो
दानवैस्तैः स्वयं ज्ञानविज्ञानवित्।
किन्तु तत्प्रेरितः कोऽपि दैवीं श्रियं
सम्यगावन् नृपो वा कुमारो बली ॥9

किन्तु कोऽद्यास्ति तादृक् कुमारः क्वचित्
पार्थिवः पातु यस्तां श्रियं शारदीम्।
अद्य पानार्थिनः सन्ति भोगार्थिनः
सूनृतां वाचमास्ये तता बिभ्रतः ॥10

वाचि हैयङ्गवीनं सदा बिभ्रतः
स्वान्ततीक्ष्णासिधारा वहन्तोऽभयाः।
निस्त्रपं धापयन्ति स्रजः कुत्रचिद्
धारयन्ति स्रजः स्वैरिताश्च स्वयम् ॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भक्तिरन्यत्र किन्त्वास्यभक्तिः परा
सत्यनारायणे ऽसत्यसेनाजुषाभ्।
सर्वमेवास्त्यसत्यं बलं, ह्रीर्मृषा
श्रीर्मृषा गीर्मृषा धीर्मृषाऽसद्व्रताम्॥12

सर्वगोऽसौ किमस्तीप्सितं तस्य किं
क्रीडनं केवलं लक्ष्यमेकं विभोः।
सत्यमेवास्ति किं शून्यतां यापितं
क्रीडने सूत्रधारोत्तमेनैव तत्॥13

एष हृत्प्रान्तरे लक्षितो जातु चित्
तत्क्षणादेव दुर्दर्शतामाप्नुते।
युष्मदः पात्रता रोचतेऽस्मै न किं
पूरुषस्त्वद्वितीयः स एवास्ति भोः॥14

अद्वयोऽस्त्येकलः कोऽद्वितीयोऽपर–
स्तर्हि लोके द्वितीयाद् भयं कीदृशम्।
द्वैतभावा इमे कीदृशाः सर्वतो
भीतिमुत्पादयन्त्येव लोके कथम्॥15

यद् भवेत्तद् भवेन्नैव किञ्चित् स्फुटं
सर्वतो द्वन्द्वमेवात्र दृश्यं भुवि।
किन्तु कः पृष्ठतो ऽयं सुनिर्द्वन्द्वतां
शास्ति मां युक्तिभिर्लक्षशोऽनारतम्॥16

किं विदध्यामहं कुत्र यायामहं
कुत्र शर्माप्नुयां द्वन्द्वलीने ग्रहे।
कुत्र सत्यं कुतः सुन्दरं दृश्यतां
नैव शैवी विभा क्वापि संलक्ष्यते॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"मा शुचः" स्वे प्रवर्त्तस्व मार्गे पुरः
पृष्ठतः सोऽनिशं ते ऽस्ति संरक्षकः।
गच्छ चागच्छ नैकैः शुभैः कर्मभि –
स्तैः समभ्यर्च्य तं त्वं कृतार्थीभव ॥18

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समता, ममता

समता का ऽऽ रामाणां
विविधसुमनसां विभिन्नरूपाणाम्।
एषां ममता समता
ममाहमेते ममैवेति ॥1

ममताऽऽधारा समता
समताऽऽधारा ऽस्त्यसौ च ममताधीः।
अन्योन्याश्रयतेयं
पुनातु जगतीमिमां निखिलाम् ॥2

नाहङ्कारो ममता
लम्बाङ्गुलिकर्त्तनं न समता वा।
ममता विश्वात्मैक्यं
समता च समग्रधीः करुणा ॥3

कश्चित्तनुजः कश्चित्
पौत्रः कश्चित् पिता पितृव्यो वा।
सर्वे सम्मन्यन्तां
यथानिसर्गं यथौचित्यम् ॥4

सुमनस इमा विचित्रा
विचित्रवर्णा विचित्रगन्धगुणाः।
सर्वाः समसौन्दर्याः
सममानाः सन्ति सम्मान्याः ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मधुरः शमयति वातं
रसो, न कटुको न तिक्तकाषायः।
स एव कफमेधयति
क्रमो विचित्रः सदा प्रकृतेः ॥6

वातकफपित्तसाम्यं
प्रकृतेः काम्यं तथापि निरवद्यम्।
नैकः कोऽपि समस्तं
निरङ्कुशः "स्वं" निगृह्णीयात्॥7

उद्यानं जगदखिलं
विरिञ्चिकल्पितमिदं सुरमणीयम्।
ममतासमताद्वारा
पश्य च जिघ्र च विविधतास्ताः ॥8

एते तरवस्तरवः
शाखाः शाखाश्च सन्ति नैवान्याः।
सुमनस इमाः सुमनसः
सौन्दर्यं किन्तु सर्वमद्वैतम्॥9

अवलोकय सौन्दर्यं
तत्राद्वैतं तदेव समताऽपि।
सौन्दर्यं, ममता सा
समता सा सह चरन्ति सदा॥10

जगदिदमशेषमेवं
विभिन्नवर्णं विभिन्नरुचि रम्यम्।
दृष्टौ रुचिरमरुचिरं
शिवमखिलं सुन्दरं सत्यम्॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अद्वैतमेव समता
तदेव ममता तदेव सौन्दर्यम्।
खण्डे कुतोऽस्ति ममता
समता वा सत्यसौन्दर्यम् ॥12

विहगाः प्रत्यहमुषसि
स्वचूड्कृतैस्तैः किमप्युपदिशन्ति।
वसुधां भज हरिताङ्कां
स्मरन् समग्रं दिवोऽद्वैतम् ॥13

गिरितरुसरित्समुद्रा
गावः श्वानस्तुरङ्गमाः करिणः।
विहगा अजाश्च मेषाः
सर्वेऽस्माकं सनातनाः सुहृदः ॥14

स्पृशति समीरः प्रेम्णा
सर्वानस्मान् न जातु दृश्योऽसौ।
स्पृशति स तथैक एव
सर्वानस्मान् समग्रात्मा ॥15

दृश्योऽपि न स सुदर्शः
स्पृश्योऽपि न सोऽस्ति जातु सुस्पर्शः।
अनुभूतिसपदिजातो-
ऽप्यजः समात्माऽस्ति नटराजः ॥16

ढक्कानिनादपवनः
प्राणानखिलानिमान् नुदति गतिमान्।
एका कला हिमांशोः
श्लिष्यति कलयति सनातनताम् ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लालाटिकोऽनलकणः
पचति समस्तान् दिवां भुवां भावान्।
जयति स एष महेशो-
ऽनन्ताकृतिरेक एव विभुः ॥18

परमे व्योमनि लीनः
पीनः परमोऽप्यणोरणीयान् सः।
रमते नानाकृतिभिः
सर्गवितानैर्विविधवर्णैः ॥19

विश्राम्यति स तपःसु
ज्वालां विस्मृत्य मूर्धवह्निधृताम्।
सततसमत्वमनीषे
तस्मिन् भेदः क्व विश्रमाश्रमयोः ॥20

न स कुरुवे किमपि कदा-
ऽप्यखिलस्तस्यैव किन्तु सन्तानः।
तस्य न वाञ्छा काचित्
सर्वा वाञ्छास्तदुद्भूताः ॥21

ममतासमताऽन्वितिमान्
स एव यो वेद साम्बशिवरूपम्।
समताऽन्यथा न समता
ममताऽपि न साऽस्ति ममता वा ॥22

दृश्यं यदपि जगत्यां
यदप्यदृश्यं स्वनेत्रयोर्विश्वम्।
सर्वं तत् सममानं
सम्मान्यं सर्वभावेन ॥23

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तर्पणमर्पय सुमनाः
पितृषिपरिचरगणेभ्य एतेभ्यः।
दृश्येभ्योऽदृश्येभ्यः
श्रद्धैषा ते महाशक्तिः ।।24

श्रद्धा प्रेमा भक्तिः
शक्तिश्चैतानि सन्त्यभिन्नानि।
भज विश्वं निखिलमिदं
समं त्वदीयं तदीयस्त्वम् ।।25

वेदान्ताक्षरपाठैः
किं सेत्स्यति ते मनोस्तनूज सखे।
एकं भावय चित्ते
तदैव वेदान्तिता सिध्येत् ।।26

एकं वद चैकीभव
प्रतिपलमेकात्मतां समेषु भज।
स एव वेदान्तस्ते
स एव भविता त्वदुद्धारः ।।27

एकं बिना स्युरेते
किमनेके क्वापि जातु विश्वस्मिन्।
एकीभावेऽप्राप्ते
खण्डाः कस्योपकारकास्ते स्युः ।।28

कृतमद्वैतद्वैत–
प्रविवादैरेभिरर्थशब्दमितैः।
योऽर्थः स एव शब्दो
द्वैतं नो भिद्यतेऽद्वैतात् ।।29

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ममतासमताप्रणया-
द्वैतं साधय सुयत्नतो मतिमन्।
तव सैव सिद्धिरिष्टा
मा भूरिह पलमनवधानः ॥30

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विनेता नेता च

एक आसीद् विनेता स्वशिष्यात्मनाम्
अन्य आसीच्च नेता विभेत्ता नृणाम्।
तावुभौ चित्रगुप्तस्य कार्यालयं
प्रापतुः स्वीयकर्माभिलेखार्थिनौ ॥1

यौगपद्येन तौ तत्र दृष्ट्वा समे
विस्मितास्तेऽभवन् कार्यसञ्चालकाः।
एक आसीत् स भुक्तं न पुण्यं मनाग्
येन, चान्यश्च नाभुङ्क्त पापं मनाक् ॥2

चित्रगुप्तोऽपि किङ्कार्यमूढः स्वयं
नैव निश्चेतुमत्राशकत्तं विधिम्।
येन पुण्यस्य पापस्य कोषौ द्वयो
रिक्ततां सम्भजेतां तयोर्जीवयोः ॥3

"अस्मि निष्कामधर्मा यथेच्छं हि मां
दुःखभाजां समाजे प्रहिण्वन्तु भोः।
दुःखमेषां प्रपद्यैव तोषं लभे
नैव मे कामभोगादिकेषु स्पृहा" ॥4

इत्ययं स्पष्टवक्तुर्विनेतुर्गिरा–
माशयश्चित्रगुप्तस्य पस्पर्श हृत्।
एष पुण्यप्रभामण्डितः को हि तं
वासयेत् क्वान्यतः स्वर्गलोकादृते ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नेतृवर्योऽब्रबीत् ''सेवकोऽहं सदा
लोकचक्रस्य, चक्रं प्रतीकश्च मे।
एष ''तन्दूर'' वह्नौ प्रियां निर्दहन्
लोकचक्रं भजेऽहर्निशं भाषणैः ॥6

तत्र लोकेऽप्यसेविष्यहं भाषणैः
क्वात्र लभ्या मया तादृशी भूमिका।
एष आचार्यवर्यः सहायान्मया
सेवितुं तं त्वमाज्ञां प्रदेहि प्रभो'' ॥7

''नैष आचार्यवर्यः कदाचित् कुतो-
प्यासनं स्वं जहौ सेवमानो विभुम्।
एक एवास्य सेव्यः स तं सेवते
सोऽपि नोपेक्षते तं पलं रक्षकः ॥8

त्वं त्वमेवासि हे नेतृवर्य स्वया
मायया संवृतात्मप्रभो वञ्चकः।
सोऽप्यसावेव नान्यः स्वया विद्यया
सम्भृतात्मप्रकाशः सतां रञ्जकः ॥9

नोचितं स्यादिदं, त्वं न योग्यः सखे
नैव साकं विनेत्रा तव स्यात् स्थितिः।
पापमेवास्ति नान्यत् किमप्यस्ति भोः
पुस्तिकायां क्वचिद् वर्णितं त्वन्निधौ ॥10

पश्य लेखामिमां त्वं कदाचिद् गृहं
प्राप्य तस्यान्तिके वेशितो भोजितः।
तस्य पुत्रान् विनेतुश्चटूक्त्या क्षणै-
र्भिन्नवान् किं कथा विस्मृता साऽस्य भोः ॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तर्हि जातिस्तवास्त्येव भेदात्मिका
त्वं न नेता, विनेता न, भेत्ता परः।
एष नेता विनेता प्रणेता सतां
संयुनक्त्येष भिन्नान् गुणैस्तैर्दृढैः ॥12

तर्हि कश्चिद्विधिश्चिन्त्यते सत्वरं
पापभोगाय ते मा स्म भूश्चिन्तितः।
अस्ति चिन्ता तु नः किं कथं पुण्यभाग्
एष भोक्ता फलं जातु सत्कर्मणाम् ॥13

प्रेषितोऽनेकशः पुण्यभाक् सेवितुं
पुण्यभोगाननेकानसौ सात्त्विकान्।
एष भुङ्क्ते न किञ्चित् तपस्यत्यहो
तेषु भोग्येष्वपीतस्ततो वा भृशम् ॥14

चक्षुरस्येक्षते सर्वतः शङ्करं
कर्णयोर्नादढक्काश्रुतिः केवलम्।
स्पृश्यते त्वक् च कैलासशृङ्गानिलै-
रुन्नतं नासिकाग्रं समाधेः सुहृत् ॥15

याति यत्राप्यसौ तत्र तापं नृणां
मूर्धनि स्वे निधत्ते विधत्ते तपः।
कृत्स्नमेवास्य विश्वस्य शैवं मह-
स्तेन सार्धं सदा विश्वनीडैकदृक् ॥16

व्यक्तिरेवास्य विश्वानुकम्पामयी
भक्तिरस्यास्ति मैत्रीमयी विश्वतः।
एष सच्चिन्निधिः सर्वदाऽऽनन्दधीः
साम्यधीः साधुपापेषु निर्विक्रियः ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्य कर्त्तृत्वधीरेव नो कुत्रचिद्
ब्रह्मभूतः समस्तोऽस्य कार्यक्रमः।
यस्ततोऽवाप्यते पीयते भुज्यते
सोऽपि भोगः प्रभोरेव तत्सम्मतः ॥18

नास्ति किञ्चित्तदीयं कदाचिन्मतं
नास्ति कर्त्ता स कृत्यं न वा साधनम्।
पुण्यकोषोऽक्षयस्तस्य पूर्वार्जितो
नैव याति क्षयं वर्धते त्वेव सः ॥19

तस्य कार्पण्यमेतत् सुपुण्यव्यये
पापकोशक्षये तच्च तेऽहर्निशम्।
मां समुद्वेजयत्येव लेखाद्वयं
किं विदध्यां यथा कुण्डलीस्यादिदम् ॥20

त्वद्व्यवस्था तु मत्सेवकैः साधिता
पङ्ककोषस्त्वदीयः सुरिक्तीभवेत्।
यो न भुङ्क्ते न शेते न सन्तिष्ठते
यस्य सर्वं परस्मै कथं क्वात्मने ॥21

तर्हि नेतस्त्वया गम्यतां भुज्यतां
पापराशेः फलानां चयः पाचितः।
वेद्मि नो किं विदध्यां विनेतुः कृते
कान्दिशीका वयं चासमर्था वयम् ॥22

हे विनेतस्त्वयैवानुकम्प्या वयं
दर्शयास्मान् पथस्ताँस्त्वमेव स्वयम्।
यैर्भवत्पुण्यराशिव्ययो द्राग् भवेन्
नूतना लेखिका ते च निर्मीयताम्" ॥23

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''त्वं महालेखलेखाप्रधानः प्रभु–
लेंख्य एवाहमद्यापि नो लेखकः।
त्वं लिखाद्यापि तद्यत्किमप्यस्ति ते
लेख्यमेतस्य पृष्ठे जनस्याधुना'' ॥24

इत्यवोचद् विनेता महालेखकं
चित्रगुप्तं प्रकृत्यार्पितस्वोऽमलः।
तस्य नार्थः फलेनापि नो कर्मणा
सोऽस्त्यसावेव नान्योऽभिमानात्मकः ॥25

चित्रगुप्तोऽभवच्चिन्तितोऽपूर्वया
लेखया तादृशा यत्र नो निष्कृतिः।
तत्क्षणेऽभूद्विनेताऽप्यसौ चिन्तित–
स्त्रायतामेष केन प्रकारेण भोः ॥26

चिन्तयित्वा मनागब्रवीत् सत्वरं
सर्वभूतात्मवीक्षापरोऽसौ महान्।
''सन्ति यावन्ति पुण्यानि शिष्टानि मे
तानि सर्वाणि नेत्रे प्रदत्तां भवान् ॥27

नैव नेत्रा कदाचिद् विसर्गः कृत–
स्तस्य लुण्ठाकतैवाऽस्ति धर्मः परः।
एष जन्तु र्विसर्गस्वभावोऽनिशं
तुष्यतामेवमेतावुभौ त्वद्गृहे'' ॥28

अभ्यनन्दद् गिरं तां स नेता हसन्
किन्तु गुप्तोऽभिनन्देत् कथं व्यत्ययम्।
''नैव हस्तान्तरं जातु पुण्यं प्रया–
त्येष किं लोप्यतां त्वत्कृते नः क्रमः ॥29

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"क्षम्यतां नाहमभ्यागतो याचितुं
किञ्चिदस्मत्कृते श्रीमतां संसदि।
नैव जह्यामहं मे स्वकीयं क्रमं
कुण्डलीस्यात्तु लेखा कथं श्रीमताम्" ।।30

"वञ्चना लुण्ठना भेदना हारणा
दम्भमिथ्याकलाविश्वसम्मोहनाः।
योऽदधाच्चैव धत्तेऽधुनाऽप्येष भोः
स्यात् कथं पुण्यभाक् ते क्षणैः साम्प्रतम् ।।31

यस्य नैकाऽपि लेखा क्वचिद् भूतले
पुण्यलेशस्य, येनार्जितं दुष्कृतम्।
येन विद्यालया नाशिताः स्वक्क्षुरै-
र्येन देवालया दूषिता दम्भकैः ।।32

तेन नैका अमूर्बालिका मोहिता-
श्चुल्लिकायां प्रदग्धाः पुनर्निस्त्रपम्।
तेन विद्यार्थिनां नाशिता उद्यमा-
स्तेन सन्तः सदा न्यक्कृताः खण्डिताः ।।33

किं कृतं तेन यत् पुण्यभाक् ते भवेत्
सोऽधुनापि म्रदीयान् क्षुरः कर्त्तकः।
कीदृगौदार्यमेतत् कुपात्रार्पितं
मृष्यतां तत् कथं न्यायनेत्रा मया ।।34

तर्हि मां शाधि किञ्चिद् गुरो, निर्वृतिं
प्राप्नुयां केन मार्गेण सद्यः सखे।
त्वं परेषां हिते वर्त्तसे सर्वदा
सर्वभावेन धीमान् रतः स्वात्मना ।।35

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यतां पुस्तिका, सर्वमत्र स्फुटं
सत्यमेतेन नोक्तं सकृज्जीवने।
सर्वदाऽयं प्रपञ्चेषु मिथ्यावृति-
ष्वेव खेलत्यखेलन्न खेलिष्यति ॥36

क्षम्यतां पुस्तिकेयं ब्रवीति स्वयं
नेतृवर्यो भवन्तं जिघांसुः सदा।
सर्वदैवावधीदुन्नतीर्भौतिकी-
रागतोऽत्रापि हन्तुं स आध्यात्मिकीः ॥37

तालिका नैकहस्तोद्भवेति प्रथा
सर्वलोकप्रसिद्धाऽप्यभूत् खण्डिता।
त्वं प्रशान्तः सहायोऽस्य नित्यं सखा
किन्तु तेनानिशं न्यक्कृतोऽभूद् भवान् ॥38

त्वं सदैवास्य रक्षाविधौ प्रोद्यतो -
ऽसौ तु नित्यं तव व्याहतौ प्रोद्यतः।
वेद्मि नो सख्यमेतद् भवेत् कीदृशं
तद्विषं त्वत्सुधा-कीदृशः सङ्गमः ॥39

त्वं समस्तं विसृज्यापि नम्रः सदा -
ऽसौ समाहृत्य सर्वं वदान्यो महान्।
जीवनं ते परेषां कृतेऽभीप्सितं
स्वार्थमेवास्य तूष्णीं प्रजालुण्ठनम् ॥40

तर्हि कीदृग् भवेदेष वां सङ्गमः
कीदृगेषाऽस्ति मैत्री भवत्काङ्क्षिता।
एकतो ह्यन्धकारः परो वारक-
स्त्वन्यतोऽस्ति प्रकाशः परो धारकः ॥41

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शाधि मां हे विनेतः कथं प्राप्नुयां
निर्वृतिं चापि मुक्तिं भवल्लेरवतः।
एकतस्त्वादृशां पुण्यलेखाकुलः
पापलेखाऽऽकुलश्चाहमेतादृशाम् ।।42

आद्रिये भावनास्तेऽतिपातञ्जलीः
सर्वदोपेक्षसे पापपङ्कावलीः।
किन्तु पुण्यावली स्यात् कथं सत्कृता
पापभूभृद्गणश्चेज्जगत्येधते ।।43

शाधि मां शाधि मां व्याकुलं दुःखितं
कान्दिशीकं गृहीतं भवल्लेखया।
किं विदध्यां यथा मुक्तिमद्याप्नुयां
त्वत्सुपुण्यावलीनां महाकाननात्" ।।44

प्राहसद् वाचमाकर्ण्य चित्रां च तां
चित्रगुप्तस्य गुप्तां विनेता गुरुः।
"यन् ममाभीप्सितं तत्त्वयाऽऽकर्णितं
यद् भवत्कल्पितं तन्मयाकर्णितम् ।।45

मध्यमः कोऽपि मार्ग स्तथा चिन्त्यतां
येन सिद्धं भवेन्नौ समं कल्पितम्।
मध्य एवार्जुनोऽसौ प्रतिष्ठापितः
प्राप्तवान् ज्ञानरत्नं प्रभोः प्रार्थितम् ।।46

नाभिमानः क्वचित् कल्पते कस्यचि–
च्छ्रेयसे तत्तु सर्वे विदुर्ज्ञानिनः।
तर्हि विस्मृत्य भेदानसत्सत्परान्
धीयतामद्य धीः काऽपि नूत्ना समा ।।47

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केनचित् किञ्चिदुक्तं कृतं कल्पितं
द्विः सकृत् त्रिश्चतुर्जीवनेऽनेकशः।
नूनमेवाहितं कस्यचित्, कस्यचित्
तद्धितं सन्तनोत्येव नो संशयः ॥48

नैव पूर्णं क्वचित् किञ्चिदेकान्ततो
नैव पुण्यं क्वचित् किञ्चिदेकान्ततः।
नैव पापं क्वचित्किञ्चिदेकान्ततः
किं कथं कुत्र निर्णीयतां निश्चितम् ॥49

सन्ति सर्वे भवन्तो महास्वामिनः
कर्त्तुमर्हा अकर्त्तुं यथेच्छं समम्।
सृज्यतां विश्वमेवाखिलं सुन्दरं
पङ्कहीनं पवित्रं सदानन्ददम् ॥50

अस्ति धर्मस्य पन्थाः कथं दुष्करः
पापमार्गः कथं दृश्यते सुन्दरः।
एक एवास्तु पन्थाः समेषां शुभः
किं विधानं न तादृक् त्वया रच्यताम् ॥51

आह कश्चित् स्वरैरुच्चकैर्मानवः
काम एकः समेषां निधिः प्रार्थितः।
कश्चिदन्यस्तथैवार्थमेवाखिलं
साधनोपेतमातिष्ठते शेवधिम् ॥52

एकमेवाद्वितीयं सदानन्दचि-
द्रूपमेतत् परं सत्यमातिष्ठते।
कोऽपि पश्यन् समेषु स्वमेवात्मसु
प्रेक्षमाणः समानात्मनः स्वात्मनि ॥53

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञानमानं सहन्ते न केचित् परे
ज्ञानदीपः प्रवातैर्हि निर्वाप्यते।
भक्तिरत्नावली धीयतां मानसे
नित्यदीप्रेति केचिद् बुधा मन्वते ॥54

केचिदाहुर्न युद्धं विना जीवनं
युध्यतां युध्यतां युध्यतां युध्यताम्।
केचिदन्ये जहत्येव शान्त्यै समं
स्वार्थमप्यन्तरात्मप्रभाः सन्ततम् ॥55

दृश्यते यत्तदेवास्ति सत्यं जगत्
तत् सदा रम्यतां दृश्यतां भुज्यताम्।
केचिदन्ये त्विदं नश्वरं मन्वते
यत्त्वमूर्तं तदेवास्ति तेषां सुहृत् ॥56

सृष्टिमूले मधुः कैटभो वा कथं
जायतेऽन्तर्विरोधप्रतीकोऽनिशम्।
सोऽतिशेतेऽपि नारायणं विक्रमे
तद्वधस्तद्वराधीन एवास्ति किम् ॥57

आसुरी शक्तिरन्तर्विरोधात्मिका
विश्वमावृत्य कृत्स्नं स्थिता भीषणा।
नैव शान्तेः कथा कुत्रचित्तां विना
नो कथाऽप्युन्नतेः कुत्रचित्तां विना ॥58

धर्म आधीयतामर्थ आनीयतां
काम आसेव्यतां मोक्ष आधीयताम्।
सर्वमेवार्ज्यतां नार्ज्यतां वा किम-
प्यस्ति सर्वं हि तस्यामधीनं सदा ॥59

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किङ्कृता शक्तिरेषाऽऽसुरी कल्पिता
सर्वसद्भावसंरोधिनी भेदिका।
साऽतिशेते कथं दिव्यशक्तिं परां
किङ्कृतस्तादृशस्तत्प्रभावोऽमितः ॥60

त्यज्यतां तर्हि वार्त्ता मृषासत्ययोः
पापपुण्याह्वयोः कर्मणोश्चेतसोः।
यो यदेवाभिधत्ते विधत्तेऽथवा
तत्तदेवास्तु पुण्यं तदीयं महत् ॥61

यस्य यद् यद् भवेदीप्सितं तत् समै-
स्तस्य धर्मः कथं नोररीकार्यताम्।
कीदृगेषा त्वदीयाऽस्ति निग्राहिका
ऽनुग्रहाश्वासिका वा व्यवस्था प्रभो ॥62

यो निगृह्यः स एव श्रियोऽनुग्रहं
प्राप्य पूज्यः सदोच्चासनावस्थितः।
यश्च पूज्यः प्रतोलीषु भिक्षुः स हा
भ्राम्यति श्राम्यति क्राम्यति प्रत्यहम् ॥63

स्यात् कथं मानवानामनास्था न भो
धर्मशास्त्रेषु सत्यप्रभाप्रीतिषु।
नैव सत्यं कदाचित् सुखं सेव्यते
तस्य धारा क्षुरस्येव तीक्ष्णा शिता ॥64

किं विधत्तां मनोर्वंशजः पुत्रक-
स्तस्य नास्ति क्षणं काऽपि निश्चिन्तता।
क्वापि लोकात् कदाचित्त्वमुष्माद् भयं
तस्य, नो विश्रमो जातु नो विक्रमः ॥65

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एष साम्यं मुखेनानिशं भाषते
किन्तु वैषम्यमेवास्य भाग्ये स्थिरम्।
बद्ध आदर्शयाथार्थ्यबन्धद्वये
नैव भुङ्क्तेऽनुरागं विरागं न वा ।।66

उत्तमाङ्गं तदीयं महासागर-
स्तत्र रत्नान्यनेकानि लीनान्यहो।
किन्तु नक्राः सुदर्शास्तरन्तो बहि-
र्नैव तानि प्लवन्तेऽधिवेलं कथम् ।।67

तर्हि हे धर्मगुप्त स्विकां पुस्तिकां
वीक्षतां तां च सम्यक् सदा रक्षतात्।
किन्तु मूले विरोधाः सुलक्षास्तु ये
ते विधात्रैव संशोधनीया द्रुतम् ।।68

एष आसीत् गुरा धार्मिकस्त्यागभृत्
पोषकः सज्जनानां परः सेवकः।
दुर्गृहीतस्तु लुण्ठाकवर्गैः पुनः
प्रापितोऽभूत् परामेष लुण्ठाकताम् ।।69

जायते सच्चरित्रो न कश्चिन्न वा
दुश्चरित्रः क्वचिज्जन्मना कर्हिचित्।
यादृशी संस्कृतिर्मन्दिरे जन्मनो
मन्दिरे वा गुरो जायतेऽसौ स सः ।।70

तर्हि मा भूद् विधिः कोऽपि संरोधको
निर्मलीकारयत्ने विनेतुर्नवे।
दृश्यतामेष नूलः प्रयोग स्त्वया
निर्मलत्वं हि नित्यं मलं त्वध्रुवम् ।।71

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दोष एको महानेष सामाजिकः
पापशल्योद्धृतौ कोऽपि नो यत्नवान्।
एकतस्त्वेष पापी स्वयं दुःखितो
नान्यतः कोऽपि चास्मिन् दयावाञ्जनः ॥72

यः सकृत् पापकृत् सोऽनिशं पापभा–
गित्ययं केन पन्थाः कदा निर्मितः।
त्यज्यतामेष पन्थाः पुनर्यत्यतां
पापमूलोद्धृतौ विश्वविश्वालयात् ॥73

राजराज्यक्रमवस्थैव संत्यज्यतां
कल्प्यतां धर्मराज्यव्यवस्थाऽभितः।
सर्व एव स्वधर्माण एवासतां
सर्व एते मिथोऽवन्तु धर्माज्ञया ॥74

सूच्य एताः समस्ता अघानां प्रभो
पुण्यसूच्यो मदीयाश्च लेखार्पिताः।
नूतनेऽस्मिन् प्रयोगालये कल्पिते
सन्निवेश्याः परीक्षार्थमस्मिन् क्षणे ॥75

साधुपापादियुग्मेषु साम्यात्मतां
शास्ति कृष्णोऽपि पार्थं कुरुक्षेत्रके।
तर्हि लेखाः समस्ता इमाः साम्प्रतं
साधु "सस्पेंस"–सूच्यां लभन्तां पदम्" ॥76

एवमभ्यर्थितश्चित्रगुप्तस्तदा
कान्दिशीकोऽपि लेभे परां निर्वृतिम्।
आत्मयोनिं स सस्मार सप्रश्रयं
लब्धवाँश्चानुकूलां तदाज्ञां क्षणैः ॥77

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तर्हि नेता विनेता च तौ स्थापितौ
चित्रगुप्तेन विद्यालये स्वः स्थिते।
सोऽपि नेता विमुक्तस्तदा रौरवात्
सोऽपि कैलासवासाद् विनेता च्युतः ।।78

निःस्पृहोऽभूद् विनेता विसर्गप्रियः
सोऽपि नेता ददर्शात्मनस्तां प्रभाम्।
गौरवं तद् विनेतु र्जयं प्राप्नुव–
त् क्षुद्रतां तस्य नेतुः शनैरच्छिनत् ।।79

"धन्य एषोऽस्ति कार्पासवृक्षः पिता
तुलराशेर्य आवृत्य नश्छिद्रकम्।
नग्नतां निह्नुते रम्यतां प्रस्नुते
सैष विद्यार्थिनः श्रीगणेशोऽस्तु ते ।।80

स्मर्यतामात्मदोषावलिः संवृता
मानसे तेऽनिशं वर्धमाना पुरा।
दह्यतां तत्प्ररोहोऽनुतापाग्निना–
ऽन्यापराधावलिर्मङ्क्षु विस्मर्यताम् ।।81

स्वान्धकारानुभूतिः परा दर्शिका
स्वस्य रूपस्य सच्चित्सुखव्यापिनः।
तत्त्वमभ्यस्य रात्रिन्दिवं संयतो
वीक्षितुं स्वं स्वदोषान्धकारे वसन् ।।82

तत्क्षणादेव दोषो गुणीभूय ते
सर्वमेवाभिमानं समुच्छेत्स्यति।
तत्क्षणात्त्वं विनीतो महामङ्गलः
स्याः समेषां महाप्रीतिभाक् सम्मतः ।।83

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सृज्यते तु प्रकृत्या समं निर्मलं
मानवेनाखिलं दूष्यतेऽहर्निशम्।
दूषकस्त्वं त्वभूर्मानसाम्भोनिधेः
स्या इदानीं सखे भूषकः शोधकः ॥84

सर्वमेव त्वदीयं विषाक्तं मनो–
दूषकं दूषकं कायवाक्कर्मणाम्।
तैलहैयङ्गवीने अपि स्वास्थ्यदे
आविलीकृत्य ते ते त्वया मारिताः ॥85

येन केन प्रकारेण नेता भवे –
येंन केन प्रकारेण मन्त्री भवेः।
एतदेवाधिकर्त्तुं त्वया सर्वदा
सर्वनाशाय सर्वं कृतं भूतले ॥86

सेव्यतां भूतलं सेव्यतां मानवः
सेव्यतां भूतजातं चरं चाचरम्।
गृह्यतां किञ्चिदावासभोज्यादिकं
नास्तु कस्यापि कश्चिद्विरोधो यथा ॥87

दृश्यतामत्र भानोः शनैः स्पर्शनं
प्राग्दिशः प्रातरावर्त्तनक्रमं बिभ्रतः।
वर्धनं व्योम्नि तस्य क्रमेणोन्नतं
तद्गतिर्वारुणी चैवमेवंविधा ॥88

कैश्चिदादाय मासै रसाया रसं
स्वल्पमेष, प्रदत्तेऽमितं जीवनम्।
एवमादत्स्व किञ्चित् समाजात् सखे
देहि भूयस्तरां विस्मरन् दातृताम् ॥89

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नैव दाता भवान् नैव कर्त्ता भवान्
नाधिपो न प्रभुर्नापि संरक्षकः।
कोऽप्यसि त्वं स्फुलिङ्गो महाज्योतिष –
स्तत्स्मरानुस्मराव्यक्तमाद्यं विभुम्।।90

एक एवास्ति पन्थास्त्वदुद्धारकः
स्वं लघुं ते विराजाऽऽशु संयोजय।
केन्द्रशक्त्यालयेनैव संयोजिता
तन्त्रिका विद्युतोऽत्र प्रकाशायते।।91

श्वःकृते चिन्तयाऽलं क्व वेत्तीह कः
किं भवेन्नो भवेद्वा पले ह्यग्रिमे।
अद्य चायं क्षणोऽस्ति त्वदीयः स्वक –
स्तत्र जीवापि सेवस्व कल्याणकृत्।।92

वृत्त्युपायान्निषेवस्व धर्म्यान् हितान्
ग्रामताबन्धुतासज्जनानां सखे।
नैव सर्वात्मना स्या विरक्तः क्वचि –
न्मा च सर्वात्मना भूः स्वसक्तः सखे।।93

विश्वमेतत् परीक्षास्थलं प्राणिनां
सर्व एव स्म एते परीक्षार्थिनः।
सन्ति चाङ्काः सहस्रं समेताः समे
षट्शतीं वाऽधिकं वाऽधिगच्छेद् भवान्।।94

नास्ति तन्त्रेण केनापि मे शात्रवं
सन्ति सर्वाणि तन्त्राणि भव्यानि भोः।
स्वार्थतन्त्रं तु यत्रैव याति, द्रुतं
तत्र सर्वं स्वयं ह्यन्धकारायते।।95

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

येन यस्मै च यस्यास्ति राज्यं स क –
स्तत्तु नैवाधुना स्मर्यते केनचित्।
येन केनाप्युपायेन राज्यं कथं
गृह्यतां हस्तयोर्मे स धर्मोस्ति मे ॥96

त्यज्यतां लक्षणं तत्तु धर्मस्य भोः
सेवमाना न तं ते सुखं शेरते।
भद्रवाग् भद्रनेत्रश्च भद्रश्रुतिः
स्याः सदा भद्रमेवास्ति चेदीप्सितम् ॥97

नैव लोकस्य भेत्ता भवेरङ्गिनो –
ऽङ्गानि सर्वाणि पश्यन् समं हृद्दृशा।
कामयेथाः समेषां सुखं सम्पदं
सौहृदं सौमनस्यं च पूर्त्तीः शुभाः ॥98

त्वं पुनर्गच्छ लोकं परीक्ष्योऽधुना
स्याश्च नेता न तादृग् यथाऽऽसीः पुरा।
त्यागसौजन्यसद्बुद्धिसद्भावनः
स्याः, शिवाः सन्तु मार्गा दिशस्ते समाः'' ॥99

एवमुक्तः स नेताऽऽत्मशक्तिं परां
ज्ञातवान् सच्चिदानन्दपूर्णां स्वयम्।
निष्कलङ्कः स शैवं महः प्राप्तवान्
सिद्धिमाप्नोद् विनेताऽपि शैवीं पराम् ॥100

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वैताद्वैतम्

दिनं त्रियामा च विभान्धकारौ
सन्ध्ये उभे माधवमाघमासौ।
प्राची प्रतीची च समे समेषां
समेत्य मुन्मङ्गलमेधयन्तु ॥1

अलं विवादैर्जगदस्ति मिथ्या
सद् वाऽस्ति तत्पूर्णमुताप्यपूर्णम्
अमूर्त्त एवास्ति स चित्रकारो
येनाखिलं चित्रमिदं व्यधायि ॥2

न दृश्यते क्वापि स चित्रकार–
स्तच्चित्रमेवास्ति सुदर्शमत्र।
चराचरं द्वन्द्वसमेतमेतद्
विलक्षणं सुन्दरमद्वितीयम् ॥3

प्रत्येकमेतत् पलमद्वितीयं
व्यक्तिः समाऽप्यत्र सदाऽद्वितीया।
अङ्गुष्ठचिह्नं सममद्वितीयं
ब्रह्माण्डमेतत् सममद्वितीयम् ॥4

अनन्तमेतत् सममद्वितीयं
भावाः समे सन्ततमद्वितीयाः।
किमत्र तन्नास्ति यदद्वितीयं
तदद्वितीयं शिरसा नमामि ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वनस्पतिः पर्वतमालिका च
सरित् समुद्रः पवनोऽ नलश्च।
समेऽद्वितीयाः सुहृदो नराणां
विस्मृत्य ताँस्ते सुखिनः कथं स्युः ॥6

तदद्वितीयं यदि विस्मृतं तैः
सदैव ते बिभ्यतु नु द्वितीयात्।
द्वितीयताधीरियमेप तेषां
प्रसूः समस्ताधिविभीषिकाणाम् ॥7

स्वं न स्तदेवानिशमद्वितीयं
शिवं द्वितीयेन विभ्राजयन्तः।
समे वयं स्वस्य ततैः स्फुलिङ्गैः
स्वमेव तैस्तैर्विधिवद् दहामः ॥8

द्वे निर्मिते ते नयने तथा द्वौ
करौ विधात्रा चरणावपि द्वौ।
द्वाभ्यां यथा भावय तत् स्वरूपं
शिवं च सत्यं परमाद्वितीयम् ॥9

विशालमत्यन्तमदृश्यमेतद्
गवेषयद् भ्राम्यति दृश्यजातम्।
अदृश्यदृश्यान्वयनं कदाचिद्
घुणाक्षरन्यायत एव मन्ये ॥10

अनन्तयात्राश्रमतो विमुक्त्यै
दृश्यालये क्वापि विशत्यदृश्यः।
शनैः शनैर्विस्मरतीव यात्रां
भोग्यैरनेकैः परिचर्यमाणः ॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यालये द्वन्द्वमये निषण्णो
न यात्यसौ तिष्ठति वाऽर्धदर्शी।
जानाति यत्तेन न तस्य तृप्ति–
र्नो वेद यत्तत्र महाविवादः ॥12

अनन्तयात्रां स हि विस्मरन् स्वां
दृश्यालये भ्राम्यति मूढचेताः।
आसन्दिका आवरणानि भूय–
श्चिनोति भोज्यानि च पेयकानि ॥13

द्वारं पिधत्ते स भृशं सुभीतः
प्रायस्तमस्येव वसत्यजस्रम्।
अभ्यासतो नेच्छति सोऽपि गन्तुं
ज्योतिष्पथं तद् बहिरन्धकारात् ॥14

अव्यक्तमूलां प्रकृतिं स्वकीयां
विस्मृत्य दृश्ये बहुमान एषः।
सिञ्चत्यजस्रं विटपं च पर्णं
मरीचिकायाः सलिलैर्न मूलम् ॥15

देवो न वर्षत्यपि नैष सिञ्च–
त्यनोकहस्यास्य कदापि मूलम्।
कथं प्ररोहेत् फलतात् कथं वा
क्रमेण शुष्यँस्तरुरेष बिभ्यत् ॥16

दृश्यालयो नास्त्यसुखो न हेयो
हेयाऽस्ति तन्मोहकतैव चित्रा।
स्वस्माददृश्यादपसार्य सर्वान्
शाखैकदृष्टीन् कुरुते कथं नः ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यालये याः सुषमाः सुदर्शा
अव्यक्तमूलाः सकला अपीमाः ।
मूलं स्मरन्तो यदि ता भजामः
क्व मोहशोकावसरः कदा नः ॥18

आवाह्यतां नैव तयोर्विरोधो
न हि स्वशाखां विरुणद्धि मूलम् ।
सेकोऽर्थवान् स्यात्तु स मूल एव
शाखाः पशुभ्यः परिरक्षणीयाः ॥19

अदृश्यदृश्ये उभये नमस्ये
समानमाने नतरामुपेक्ष्ये ।
शिवस्त्वदृश्यो गिरिजा च दृश्या
प्रणम्य तौ विश्वमिदं भजानि ॥20

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रान्तः

श्रान्तः किं करवाणि विश्रमपदं क्वाहं लभै व्याकुलो
मार्गो दृश्य इहास्ति कण्टकमयः कृत्स्नोऽन्धकारावृतः।
पारेदृश्यमनुद्धताऽस्ति सरणिर्निष्कण्टकाऽऽनन्ददा
किं न्वेतद् वचनं मृषा किमुत तत् सत्यं शिवं सुन्दरम्॥1

धातुः किं समभीप्सितं विविधतानिर्माणरक्षाविधौ
पन्थानो विविधाः कथं विरचिता लक्ष्यं तदेकं यदि।
नान्येषां विषये ममास्ति विदितं तज्जीवनं कीदृशं
ह्येताः सन्ततयो मनोस्तु सततं द्वन्द्वाहवावाहिकाः॥2

माता सा प्रकृतिर्निदाघसमये रस्यं प्रसूते फलं
माघे ब्राह्ममुहूर्त्त एव कुरुते क्वोष्णं च कूपोदकम्।
सूनुस्त्वेष मनोः सदा वितनुते दीनेषु दैन्यं पुन–
र्वित्ताढ्येषु च काञ्चनानि शतशो वर्षत्यजस्रं हसन्॥3

भ्राम्यन्नेवमनन्तलोकपथिकः क्वावाप्नुयाद् विश्रमं
यत्रायाति स याति वा यत इतस्तत्राप्नुते विभ्रमान्।
तृष्णास्तासु मरीचिकासु शमयन्नन्तः पिपासार्दितः
क्वाप्येकत्र निजासनं न लभते नो वेद वाऽन्त्यं पदम्॥4

दृश्यन्ते बहवोऽत्र तत्सहचराः, केचिन् महापण्डिताः
सर्वान् पृच्छति वर्त्ततेऽत्र सुपथः कुत्रापि नैवाथवा।
पन्था एष मया पुरा सुविदितः स्वीयात् कुलान्मुन्मयो
नो मुन् नापि च मङ्गलं तदपि ते भूयस्तदाहुर्भृशम्॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गन्तव्यं न विदुस्तथापि गमने काचित् समेषां त्वरा
मार्गो मामक एक एव सुगमः श्रेयान् समेषां कृते।
दर्पं मुञ्च विनीतिमाँश्च भवतादित्येवमाहुः सदा
दर्पेऽस्मित्वमयेऽत्यशेत नहि तान् कोऽप्यद्य यावत् कृती ।।6

शृण्वन्नेवमिदं च तच्च सततं किञ्चिद् ब्रुवन् मन्दधी–
र्धावामि प्रतिवृक्षमाप्तुमवनौ छायां तदीयां मुहुः।
वीक्षे किन्तु ततोऽपि नैव महितां छायाममूं प्रेप्सितां
पर्णान्येव न सन्ति तत्र, सकलान्यध्यासते मेदिनीम् ।।7

छायादानपरां पुराऽसकृदहो शक्तिं निजां धारयन्
पान्थानामुपकारकोऽयमभवद् ग्रीष्मे प्रतीक्ष्यः स्वयम्।
सोऽयं कालगृहीतपर्णनिचयो जिह्रेति पान्थान् पथि
श्रान्तान् वीक्ष्य "मयाऽधुना कथमिमे सेव्या, अहं निर्धनः" ।।8

कालो वेत्ति न कस्यचिद् विवशतां कारुण्यभावं न वा
कूटस्थः स्वयमिन्दुभानुवसुधाचक्रैर्मुदा खेलति।
अद्येमे तरवः प्रपर्णकुसुमाः श्वो मञ्जरीभिः फलैः
सर्वान् मोदयितार इत्यविदिता कस्यास्ति सृष्टेः कथा ।।9

अद्यैवास्ति ममाद्य सर्वमपि मे भूयात् सुखं मङ्गलं
दित्सुश्चेदहमद्य शक्तिरिह मे तादृक् कथं नाद्य मे।
श्वः किं स्यादथवा परश्व इह किं स्याद् वेत्ति को भूतले
यद् वाञ्छामि तदद्य किं न सुलभं स्यान्मे यथाकल्पितम् ।।10

अद्यैवाहमसानि पण्डितवरो वित्तेशवित्ताधिपः
स्वामी चाहमसानि सर्वजगतामद्यैव निष्कण्टकः।
स्वप्नेषु प्रथितेष्वमीषु रमते सूनुर्मनोः सन्ततं
जाग्रत् किं स करोति तन्न विदितं कस्यापि लोके मनाक् ।।11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यः किञ्चिन्न करोति किन्तु चिनुते रात्रिन्दिवं मुद्रिकाः
पूज्योऽसौ जगतां, प्रदानविमुखोऽप्यादानरत्नाकरः।
यः श्राम्यत्यनिशं निदाघशिशिरप्रावृट्सु सर्वान् भजन्
सोऽस्माकं भुवि गर्हितोऽधम इति प्राप्नोति संज्ञां जनः ।।12

कोऽयं बुद्धिविपर्ययो मतिमतां वैषम्यसञ्चारकः
कोऽयं दैन्यफलस्तरुः कथमिवात्रारोपितः केन भोः।
हुत्वा कामपि "तन्दुरानलदले" तद्भस्मना मण्डितः
पश्यायाति स बुद्धिमान् धवलवाग्वेषो ह्रियाऽप्युज्झितः ।।13

एवं चिन्तयताऽऽकुलेन मयका बम्भ्राम्यता जीवने
हेमन्ताः शरदश्च ते च ऋतवो नीता अनेके भुवि।
पन्थाः कः सुपथश्च कोऽस्ति कुपथो नो वेद किञ्चित् स्वयं
नैकाचार्यविचाररश्मिभिरपि प्रोद्भासितो नैव सः ।।14

विज्ञानं प्रकृते र्न जातु दुरितप्रस्थं न वा निन्दितं
ध्वंसः प्राकृतसम्पदामकरुणं पापाय नः कल्पते।
एताः सन्ततयो मनोर्जगदिदं कृत्स्नं भृशं वैद्युते –
र्ज्योतिर्भिस्तमसि क्षिपन्ति कुधियो दुर्भावनायन्त्रिता ।।15

अद्वैतप्रतिपादका यदि समे वेदान्तसूत्राशया
नाद्वैतं कथमद्य यावदिह तद्गेहे स्वकेऽपि स्फुटम्।
नैक्यं क्वापि विचारभारसरणौ नैक्यं प्रचारेषु वा
स्वे स्वे सद्मनि ढक्किकाः सम इमे त्वाध्नन्ति हा नीरसाः ।।16

पन्थानं न लभे क्वचित् समसमं निर्बाधमेकं भुवि
गच्छेयं क्व कथं शयै क्व, परितो मार्गं दवाग्निर्महान्।
कीदृग् विश्वमिदं त्वया विरचितं यत्रास्ति नान्या गति–
"स्तूष्णीं द्वन्द्वमये विधौ वस हसन्नन्ता रुदन् सन्ततम् ।।17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रक्तारण्यमिदं कदाप्युपनिषद्वाक्यानि नाधीतवत्
किन्त्वेकीभवदात्मना मिथ इमां पुष्णाति कृत्स्नां स्थलीम्।
चेतुं वेत्ति कलां प्रभां तु तमसः सच्चासतश्चामृतं
मृत्योः सम्यगिदं वनं मनुसुतः शिक्षिष्यते किं ततः ॥18

"व्यर्थैर्भाषणडम्बरै रलमलं तैः कृत्रिमैरासनै-
रेका सा प्रकृतिः प्रसूर्हि परमा सर्वैः समाराध्यताम्।
कश्चिन्नास्ति ततोऽधिकं तव हितं प्रेप्सुस्त्रिलोक्यां पर -
- स्तामाराध्य सुखं लभस्व सकलं भुक्तिं च मुक्तिं पराम्" ॥19

नृत्यन्ती धरणी रविं प्रतिपलं भक्त्या परिक्राम्यति
सीमन्ते स्वयमारचय्य विधिवत् सिन्दूरमैन्द्रं मुदा।
शय्यां कोकनदावृतां पुनरसौ श्रान्ताऽधिशेतेऽपरां
लीलेयं प्रकृतेर्न कस्य हृदयं सद्यः समाह्लादयेत् ॥20

नेमां पश्यति किन्तु मानवकुलं लीलां सुरम्यां शुभां
व्यग्रो नैकविधासु तासु विकटव्यापत्सु लीलास्वहो।
अप्यन्तो भविता कदापि विपदां स्वोत्पादितानां भृशं
सौन्दर्यात्मगृहे सुमङ्गलमये स्यात् तत्प्रवेशः कदा ॥21

इच्छैवास्य बलीयसी, मनुसुतः कर्त्तुं न किं स्यात् क्षमो
विश्वं विश्वमयं स्वहस्तयुगले सन्धातुमर्हः कृती।
किन्तु "प्रस्तुतविप्रतीपविधयः" प्रायेण सर्वेऽनिशं
वीक्षन्ते दधते तथा विदधते ते विप्रतीपं समम् ॥22

जिज्ञासाऽस्य मरीचिकासु महती, तादृङ् न गङ्गाजले
बध्नाति स्वयमेव कञ्चनमये लौहे स्वकं बन्धने।
बद्धः किं कुरुतां स न स्वपिति वा जागर्त्ति वा निर्वृतः
पाशोऽयं स्वविनिर्मितः क इह तं कस्मिन् क्षणे मोचयेत् ॥23

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मोक्षं वाञ्छति, बन्ध एव सततं किन्त्वस्य मोक्षात्मधी–
रानन्दः समभीप्सितोऽस्य विविधक्लेशेषु सा धीः पुनः।
कल्याणेऽभिरुचिस्तथापि रमते भद्रेषु नो कर्हिचित्
सर्वा वृत्तय एव तस्य सततं दुर्विप्रतीपा ननु ॥24

शम्भोः स्मो वरयात्रिणः सम इमे भिन्नाङ्गवेषाः प्रभो–
रिच्छास्तस्य गतीश्च नृत्यरचना नानाविधा तन्वते।
नृत्यामः प्रचलाम आत्मगतयो वर्धामहे चानिशं
साम्बोऽसौ सकुमारहस्तिवदनोऽस्मान् रक्षतात् सर्वदा ॥25

तस्यैवेहितमेतदप्यवनिपा भुञ्जन्तु, नो भुञ्जतां
भूमिं सोदधिसिन्धुपर्वतवनां सम्यक् च सन्निष्ठया।
नो भुञ्जन्ति तु तेऽद्य तामकरुणं सर्वंसहां भुञ्जते
मञ्चेभ्यो ब्रुवते सदैव जनताकल्याणवार्त्ता भृशम् ॥26

राजा सैव भनक्ति यस्तु जनतां देशं च सर्वंसहां
विद्वान् सैव भनक्ति शास्त्रवचनं योऽन्धैः कुविश्लेषणैः।
दाता सैव य आपणे दशगुणं संलुण्ठ्य दत्ते पणं
योगी सैव य आसनानि रतिदान्यध्यापयेदन्वहम् ॥27

यायां कुत्र वसानि कुत्र किमितः किं व्याहरेयं ततः
श्रोतुं नेच्छति कोऽपि सत्यमधुना क्रीतो ह्यसत्यैः समैः।
सत्यं चेदुचितं सकृन्निगदितं, सद्यो बहूनामरि–
र्जायेतात्रभवान् न तत्र हृदये शङ्का विधेया क्वचित् ॥28

सत्यासत्यकथेयमस्त्यविरतं प्रोक्ता पुराणी कथा
स्वार्थास्वार्थकथाऽपि विश्वनियतेरास्ते पुराणी कथा।
ये स्वार्थं परिहाय सत्यमनिशं सर्वात्मनोपासते
ते किं मूढधियः पराजयविपद्दारिद्र्यमात्रोत्कराः ॥29

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हे धातर्यदि "सत्यमेव जयते" सृष्टं "मृषा" किं त्वया
यत्सैन्यं सकलासु दिक्षु विजयोन्मत्तं सदा गर्जति।
सत्यं त्वेकलमेव तस्य न गणो नो वा चमूः काचन
ब्रूते तन्नतरां स्वसद्मनि समं सत्त्वं सदन्वेषयत् ॥30

आत्मानं प्रकटीकरोति न कथं सत्यं स्वयं सर्वथा
धातः किं समभीप्सितं न खलु तत् ते बिभ्यतोऽसद्बलात्।
दुःखान्तो जगतस्तदैव भविता सत्ये स्फुटे सर्वतः
सौन्दर्यं प्रकटीभवेन्नु नियतेः शैवं तदानीं स्वयम् ॥31

छन्नः सत्यरविः सितासितविभैर्मेधैरनेकैर्दिवि
म्लाना नैव गभस्तयोऽस्य विमला ज्योतिर्दिशां द्योतिकाः।
वात्या सा शिवपन्नगाननचमूनिश्वासफूत्कारजा–
स्ताँस्तानावृतिमात्रलक्ष्यकुधृतान् मेघान् समुत्सारयेत् ॥32

वात्यां तां वयमाह्वयाम उदियात् सत्यार्यमा द्राग् यथा
नश्येयुस्तिमिराणि दम्भरचितान्येतानि सद्यः स्वयम्।
दैन्यं दास्यमितः क्वचिद् व्रजतु तत् स्वाम्यं महावित्तकं
शान्तिं दिक्षु तनोतु काऽपि महिता शक्तिः सतां नूतना ॥33

सत्यं नास्ति विलक्षणं किमपि सद् धर्मः स एकः सृते –
रम्भोधिः सरितो वनानि गिरयः सर्वेऽपरे तद्विदः।
एको मानववंश एव सततं सत्यव्रतम्मन्यतां
बिभ्रत् सत्यविरोधिनी रचयतेऽनेकाश्चमूः सर्वतः ॥34

श्रेष्ठस्त्वं तनयो विधातुरिति ते सर्वे विदुस्तद्विदः
किन्तु स्वात्मपरीक्षणैः स्वभरणैः कुब्जीकृतो वर्त्तसे।
आनन्दं परिहाय सत्यतरणेः खद्योतिकानां गणान्
कोष्ठे स्वे गणयन् पुनः पुनरिह त्वं लज्जसे नो मनाक् ॥35

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्यादेव बिभेषि मञ्जनिचयात् सत्यं जपन् नित्यदा
मिथ्याचारचयेषु चैव रमसे मिथ्या सदा भर्त्सयन्।
किं त्वं वाञ्छसि किं च वक्षि कुरुषे किं वेद कस्ते मतिं
धन्यस्त्वं परवञ्चनेऽसि निरतः स्वं वञ्चयन् पूर्वतः ॥36

तद्दिव्यं समुपास्महे मह इहामुत्रापि सद् व्यापकं
मूर्त्तामूर्त्तमियच्च तावदपि चातिस्वं परं सर्वगम्।
तस्यानुग्रह एव सर्वजगतां शर्मप्रदाने क्षमः
केनासौ विधिना क्षितावक्तरेच्चिन्त्यः स सर्वैर्हृदा ॥37

धन्यस्तार्किकतल्लजः स मतिमान् गोत्वस्य यो लक्षणं
निर्दुष्टं प्रणिनाय तर्कविधिना सास्नादिमत्त्वात्मकम्।
को हेतुर्नहि तेन धूमनिचयाद् वह्नेः स्थितिं पश्यता
स्वीया ''मानवता'' कुतोऽपि महिता शास्त्रेषु संलक्षितात ॥38

इत्येवं भुवि दिव्यनेकसहितैरेकैरनेकीकृतै–
र्भावैरावृतमानसो धृतिमहं कुत्रापि नो लब्धवान्।
तल्लाभाय तथाप्यनारतमहं धावामि चेतोऽमुतः
कुर्यां किं न कुतोऽपि शान्तिसरणिः संलक्ष्यते शर्मदा ॥39

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होलिकाखेलिका

ईशलीलाभयं विश्वमेतज्जगद्
द्वे दले अत्र सम्भूय ते खेलतः।
एकतो वर्त्तते ह्लाद एकोऽचल-
श्चान्यतो वर्त्तते होलिका काञ्चनी ।।1

होलिका काञ्चनी दह्यते नाग्निने-
त्यस्ति गर्वान्चिता ह्लाददाहे रता।
"ह्लादमङ्के निगृह्यामुमाशु ज्वल-
द्वह्निना नाशयिष्याम्यदग्धा स्वयम्" ।।2

एतदाह्वानमाकर्ण्य शक्तिः परा
ह्लादनी वाचमूचे विनम्रां नता।
नैव वेदाहमन्यत् किमप्यन्यतो
ऽहं प्रसन्ना किरामि प्रसादान् सदा ।।3

होलिकाशक्तिरेकत्र हिसामयी
गर्विता हन्तुमाह्लादिकामुद्यता।
ह्लादिका तु प्रसादान् किरन्ती पुनः
सा प्रसन्ना स्वयं होलिकाङ्केऽविशत् ।।4

होलिका काञ्चनी सा तु गर्वोन्नता
ऽध्यास्त शय्यां हसन्तीह तारस्वरैः।
ह्लादनी सापि मन्दस्मितै र्निर्भया
ऽध्यास्त तूष्णी तदङ्के स्मरन्ती विभुम् ।।5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होलिका दह्यतामित्यवादीद् दिवः
काचिदव्यक्तवागादिशन्ती दिशः।
पाविता पावकेनैव सा होलिका
सद्य एवामरा साऽप्यभून्निर्वपुः ॥6

निर्वपुर्होलिका सद्वपुर्ह्लादिका
शक्तिरेषोभयी वर्त्तते जीविता।
होलिका दह्यतामर्च्यतां ह्लादिका
खेलिकेयं मनोहारिणी वर्धताम् ॥7

ह्लादिका ह्लादतेऽद्यापि मौनं नता
होलिका तत्प्रभावात् प्रसिद्धाऽभवत्।
होलिका दह्यतां ह्लादिका चार्च्यतां
खेलिकेयं मनोहारिणी वर्धताम् ॥8

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्बन्धना

एक एवास्यनुग्राहको रक्षकः
सर्वदा त्रायसे पृष्ठतो मां विभो।
स्मर्यसे प्रार्थ्यसे याच्यसे त्वं मया
किन्तु जाने न सम्बन्धनामावयोः ॥1

कोऽहमित्येव जाने न किं ज्ञास्यते
ऽन्यत् कुतोऽप्यत्र वा तत्र किञ्चिन्मया।
ईश कस्त्वं मदीयोऽथवा कोऽस्म्यहं
तावकस्तन्नु वेत्तुं सदाऽस्म्युत्सुकः ॥2

त्वं दयाम्भोधिरित्याह विद्वज्जनो
ऽहं कृपापात्रमित्याह लोको ऽखिलः।
अप्यहं त्वत्कृपापात्रतार्हो न वा
वेद्मि नाहं त्वमेवाशु मां बोधय ॥3

आदिरन्तश्च ते नास्ति नित्यार्चिषः
सर्वथा सर्वदा पूर्णतां बिभ्रतः।
अत्र सर्वेऽप्यपूर्णा वयं सर्वदा
पूर्णतायै पिबामो विभिन्नान् रसान् ॥4

अन्तिमानां समेषां त्वमस्यन्तिमो
ऽसि त्वमाद्यस्तथैवादिमानां प्रभो।
एष नादिं न चान्तं स्वकीयं स्मरन्
मध्य एवात्र वर्त्तेऽनिशं लम्बितः ॥5

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मध्यमोऽयं कदाचित्त्वनन्तायते
कर्हिचित् सान्तमेव स्वकं मन्यते।
सज्जते तेषु तेषु स्वकेषु स्वयं
कम्पते चापि तेभ्यो भयं प्राप्नुवन्॥6

नैव कर्त्ता स्वतन्त्रोऽहमस्मि क्वचित्
तर्हि कीदृक् फलं मे ततोऽवाप्स्यते।
नास्मि कर्त्ता यदि स्यां हि भोक्ता कथं
नैव कुर्वे स्वयं नैव भुञ्जे स्वयम्॥7

तर्हि कर्त्ता त्वमेवासि धाता विभु–
स्त्वं सृजस्यात्मना संहरस्यात्मना।
तर्हि कोऽहं किमर्थं त्वया निर्मितो
नैव किञ्चिन्मया किं विधेयं भुवि?॥8

स्वीयसार्धत्रिहस्तैर्मितेयं तनुः
स्वं मनश्चाप्यदृश्यं महाचञ्चलम्।
तद् द्वयं सेन्द्रियं मे किमर्थं त्वया
ऽदायि, किं सर्वमेतत् प्रभो निष्फलम्॥9

अर्धनारीश्वरस्त्वं न भेदस्त्वयि
स्त्री त्वमेव त्वमेवासि चार्धः पुमान्।
किन्तु लोकेऽत्र का ऽप्यस्ति सा कामिनी
कोऽपि मादृग् वराकस्तथाऽऽस्ते पुमान्॥10

त्वं पिताऽसि त्वमेवासि माताऽपि मे
प्रत्यहं स्तोत्रमेतत् पठामो वयम्।
किन्तु बुद्धौ कथं भावनाऽनन्तता
धीयतां सीमबन्धान्वितायां विभो॥11

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सान्त एषोऽस्मि बद्धः सदा पञ्जरे
त्वं गरुत्मान् महान् व्यापकः सर्वगः।
स्यात् कथं न्वावयोरीश सम्बन्धना
पञ्जरश्चेन्न सद्यः समुद्धाट्यते ॥12

एष एवावयोः किं भवेत् सर्वदा
नाथ सम्बन्ध, आसेऽनुकम्प्यस्त्वया।
तर्हि शीघ्रं पुरारेऽनुकम्पस्व मा-
मस्ति कोऽन्यो य ईदृग् दयालुर्भवेत् ॥13

क्षुद्रता मामकी मानसी मां स्वयं
सर्वदैषा दुनाति स्वमानेषुभिः।
सैव वध्या त्वया सानुकम्पं प्रभो
वर्धनीया च विद्यैव संस्कारिका ॥14

दायकस्त्वं महानेष आदायको
ऽहं सदाभ्यथंये त्वत्कृपां निर्बलः।
त्वत्कृपाम्भोनिधेर्बिन्दवः पञ्चषाः
सन्त्यलं छेत्तुमेता विपत्तीः समाः ॥15

एष एवास्ति सम्बन्ध ईशावयो-
रीप्सितो मज्जतो मे भवाम्भोनिधौ।
कश्चिदन्योऽपि चेदीप्सितस्ते भवेत्
क्षेमकृन्मे तमालोकय त्वं स्वयम् ॥16

त्वं हि कर्त्ता च कृत्यं तथा साधक-
श्चोत्तमस्सम्प्रदानं त्वमेवासि भोः।
त्वत्त एवास्ति सर्वं तवैवाखिलं
त्वय्यवस्थाय सर्वं स्थितं संहतम् ॥17

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तर्हि मां शाधि शून्यात्मकं सर्वद
प्रीतिदं मे भवेत् किं समेषां हितम्।
यद्धितं स्यात् समेषां भवेत् तद्धितं
यक्षराजेश्वर त्राहि मे तत् समम्।।18

नैव जाने हितं किं ममात्रामुतः
किं भवेद्यत् समेषामपि स्याद्धितम्।
तद्धितं नैव मे स्यादुपेक्ष्यं प्रभो
तत् कृदन्तैरपि स्यात् सुपोष्यं सदा।।19

निष्फला वीरुदेषाऽपि वन्ध्यं तरुं
सेवतेऽहर्निशं कामदं कामदा।
कुड्मलेः संवृता सा लता त्वेकला
शेत उर्व्यां वियुक्ता तरोः प्रेयसः।।20

किं विदध्यात्तरुर्निष्फलोऽयं विधे–
र्वंश्य एभिः सुपर्णैर्भजन् यात्रिणः।
नो फलैर्नापि पुष्पैरयं पर्णकै–
रेव सेवां विधत्ते मुदा प्रीतिमान्।।21

तर्हि केयं प्रथा पुष्पमध्या फलै–
रन्तिमा वर्त्तते नित्यमावर्त्तनी।
त्वं तु पुष्पे फले चापि बीजेऽस्फुटे
सर्वगः सर्वतो राजसे निःस्पृहः।।22

सस्पृहाः स्मो वयं व्यक्तदृश्योन्मुखा
विस्मृताव्यक्तमूलाः फलैकोद्यमाः।
तत् फलेभ्यः फलामः फलैः प्रेरिता
नो फलं चेत् सुदर्श क्षितौ शेमहे।।23

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तर्हि मां शाधि शम्भो स्फुटं कोऽस्म्यहं
को भवानस्ति कीदृक् कृपाम्भोनिधिः ।
दैन्यदुष्पापजालाकुलं मां कथं
ज्योत्स्नयाऽनुग्रहस्यानिशं त्रायसे ॥24

त्रायसे मां किमर्थं प्रभो सर्वदा
सर्वदास्मिन् महाम्भोनिधौ नक्रतः ।
सैष जाले स्वकीये निबद्धः स्वयं
प्रार्थये छेत्तुमेतान् कुबन्धान् द्रुतम् ॥25

त्वं स्वतन्त्रोऽसि कर्त्ता परश्चेश्वर–
स्त्रायसे वक्रनक्रेभ्य एवानिशभृ ।
किं न मां लब्धमोक्षीकरोषि प्रभो
जाल एवास्मि बद्धोऽधुनाऽपि स्वके ॥26

बद्ध एवानिशं चास्मि रत्नाकरे
रत्नजालानि लिप्सुस्तदन्तस्तलात् ।
मोक्षयैवाशु जालेभ्य एभ्यः प्रभो
स्यां यथाऽऽकाशचारी स्वतन्त्रोऽभयः ॥27

अत्र रत्नानि सन्तीति को वेत्ति नो
किन्तु नक्रा इमे सन्ति वक्राः शठाः ।
बन्धनेभ्योऽस्मि भीतोऽधुना नान्यतः
कामये नैव किञ्चित् परं मोक्षणात् ॥28

क्षारनीरे पृथिव्यश्रुजालेऽम्बुधौ
मज्जतो मे युगेभ्योऽत्र नक्रावृते ।
रत्नकाम्या सदा मोक्षमार्गात् क्वचिद्
दूर एषा क्षिपत्येव मां लुब्धकम् ॥29

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुन्दरं सर्वमेतन्महाम्भोनिधे–
बाह्यमन्तश्च काचिन्न शङ्काऽस्ति मे।
दर्शने च श्रुतौ रम्यता सा परा
नैव सक्तौ न वा मज्जने रम्यता ॥30

अत्र नक्राश्च वक्राः सुरत्नावलि–
श्चानिशं दृक्पथं नूनमायान्ति मे।
किन्तु नाहं तदीयान गुणान् सन्दधे
नापि ते मामकाञ्जातु सम्बिभ्रति ॥31

नाम्बुधिर्मेऽस्त्यकाम्यो न वाऽसौ निधि–
र्मज्जनादुद्विजे नक्रलोकात्तथा।
नैव सोऽहं न वाऽहं स एतत् कथं
केन लोप्येत सन्धीयतां वा कुतः ॥32

एष एवास्ति नः सङ्करः प्राकृतः
सोऽहमस्मि त्वमेषोऽनहं भेदिताः।
भेदबुद्धेः प्रभोऽस्या महाभेदक–
स्त्वामृते कः कुतोऽन्यः कदा सम्भवेत् ॥33

सन्तु नैकास्तवेमा महामूर्त्तयः
सन्तु वर्णा अनेकेऽप्यनेके गुणाः।
किन्तु सर्वेष्वहम्भूतमेकं तु तत्
सर्वदा भावयेयं स्वमेवानिशम् ॥34

विश्वमेतत् समस्तं तथैवात्मनि
प्रातिभं भावयेयं सुमैत्रीमयम्।
नैव रागः क्वचिन्नैव रोषः क्वचिन्
नैव मात्सर्यमायातु मन्मानसे ॥35

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्तु सिध्येत् कथं? पृष्ठतो वामतो
दक्षिणे च स्फुलिङ्गा। अनेके तताः।
भाययन्तोऽनिशं ते दहन्त्यात्मनः
शान्तिमत्तामशान्त्यूष्मणो वाहकाः ।।36

निर्मितं गात्रमेतत् तथा कोमलं
निर्मितो माधवार्कस्तथा दुःसहः।
कीदृशीयं मिथो दुःसहा भावना
कीदृशीयं तथैवास्ति सम्बन्धना ।।37

अत्र रुग्णाः स्वयं ते चिकित्सापराः
स्वस्थगात्रेन्द्रियार्थाँश्चिकित्सन्ति भोः।
दम्भमात्राऽतिशेतेतरां मात्रिका
आत्मशक्तिप्रकाशस्य, किं कथ्यताम् ।।38

सा कथाऽऽसीत् पुराणी यदाऽसौ महा–
रोहितोऽभक्षयन् मत्सिकाः क्षुद्रिकाः।
सोऽधुनाऽऽस्ते त्वहिंसाव्रतः सात्त्विक–
स्तं जिघांसन्ति सम्भूय ता मत्सिकाः ।।39

अस्य विश्वस्य सम्बन्धना कीदृशी
भक्षको यो न किं सोऽस्ति भक्ष्यः स्वयम्।
हे पुरारेऽनुकम्पाम्बुधे सत्वरं
हन्यतामेव सम्बन्धना तादृशी ।।40

किं न वन्यो भवेन्मानवोऽ नोकहो
यः पिबन् स्तन्यमेवाचलायाः स्वयम्।
जायते वर्धते पत्रपुष्पैः फलै–
र्भक्षको नैव कस्यापि भक्ष्योऽथवा ।।41

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य पुष्पाणि पर्णानि नूनं वयं
भुञ्ज्महे नातिथेयस्य नो निर्भरम्।
किन्तु सोऽपि स्वतन्त्रो वदान्यो महाँ–
स्तादृशा एव भोक्तार एते वयम्।।42

किन्तु लोकेऽत्र भक्ष्यः समस्तोऽबलः
शक्तिमानस्ति भो भक्षकः सर्वतः।
एष सम्बन्ध ईदृग् द्रुतं हन्यताम्
ईश सम्बन्ध आप्तश्च निर्धार्यताम्।।43

एवमेवात्र चौरस्तथा चोर्यको
मारकश्चापि मार्यश्च सन्दृश्यते।
शोषकश्चापि शोष्यस्ततः सर्वतो
नेदृशः सन्तु सम्बन्धना जीविताः।।44

सन्तु सर्वे समेषां मिथः पोषकाः
सन्तु सर्वे समेषां मिथो हासकाः।
सन्तु सर्वे समेषां मिथो रक्षकाः
सन्तु सर्वे समेषां मिथः पूजकाः।।45

मा भवद् भेदबुद्धिः क्वचित् कस्यचिन्
मा भवद् द्वेषबुद्धिः क्वचित् कस्यचित्।
मा भवत् पक्षबुद्धिः क्वचित् कस्यचित्
सौमनस्यं समेषां स्वतो वर्धताम्।।46

मा भवद् विस्मृतिर्भव्यभावात्मनां
मा भवच्च स्मृतिर्दुष्कृतां कर्हिचित्।
मा भवन्नः प्रमादः स्वकृत्येषु भो
मा भवन्नः प्रसादः परार्त्तौ क्वचित्।।47

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मा भवत् कस्यचित् कोऽपि भारो जनः
कस्यचिन्मा भवत् कोऽपि वश्योऽथवा।
मा प्रभुः कोऽपि भूत् कस्यचित् पार्थिवो
मा भवत् कोऽपि दासोऽथवा कस्यचित्।।48

मा भवत् क्वापि नैराश्यभावः सतां
मा भवद् विप्रयुक्तिश्च लक्ष्म्या गिरः।
मा भवद् दुर्गतिः सत्यनिष्ठावतां
मा भवत् काऽपि हानिः क्वचित् कस्यचित्।।49

मा भवन्माधवोऽत्यूष्मवान् कर्हिचिन्
मा च माघो हिमानां भवद् वर्षकः।
मा भवद् भाद्रकः प्लावकः सम्पदां
मा भवन् सम्पदः प्लाविकाः सन्मतेः।।50

मा भवत् सा मतिर्भेदिका कर्हिचिन्
मा भवत् सा मतिः क्लेशिका कर्हिचित्।
मा भवत् सा मतिर्भ्रामिका कर्हिचिन्
मा भवत् सा मतिर्मोहिका कर्हिचित्।।51

धातवो मा भवन्नुद्धताः कर्हिचिन्
मा भवञ्जातु ते दुर्बला वा क्वचित्।
मा गमन् स्वैरितामिन्द्रियाणि क्वचिन
मा बुभुक्षा भवद् बाधिका संस्कृतेः।।52

विश्वनाथानुकम्पस्व सानुग्रहं
सम्बधान स्वयं मां स्वकीयात्मना।
स्याद्यथाऽयं लघीया "नहं" निश्चलः
सोहं" मित्येव भूयाद् विजेता परः।।53

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सौर एवास्ति सर्वंसहाऽपि ग्रहः
किं न सा तेऽनुकम्प्याऽस्ति विश्वम्भर।
अत्र हंसा बुभुक्षार्दिताः शेरते
कुर्वते त्वत्र "कॉ कॉ" इमे वायसाः ।।54

वायसाः कौशिका वा मराला वकाः
सर्व एवात्र जीव्यासुरानन्दिताः।
किं न कश्चिद्विवेकी द्विजो मानसे
निर्मले स्वादु भुञ्जीत पद्मामृतम्।।55

भोक्तृसंख्या भवेत्तावती यावती
स्वादुमात्रा निसर्गे भवेत्तावकी।
नैव भोक्त्रल्पता नापि भोग्याल्पता
भूम मा भूमहीना वयं भूमिजाः ।।56

भूमिजानां समेषां हि सम्बन्धना
स्यात्तथा साम्यबद्धा दृढा सद्बला।
नैव कुत्राप्यभावो यथा सम्पदां
स्यात्, समे स्यू रयीशा मिथः पोषकाः ।।57

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाने न किमपि

1.

जाने न किमपि न किमपि
प्रभो स्वरूपं त्वदीयमिति जाने।
जिज्ञासेऽपि न किञ्चिद्
यस्त्वं यादृक् तथैव मां पाहि॥

2.

जाने नाहं किञ्चित्
स्वमपि मदीयं स को ऽहमस्मीति।
अन्यत् किं जानीयां
किमिदं विश्वं भवान् क इति॥

3.

अपरिमिता जिज्ञासा
ज्ञानमसीमं न चास्ति मे काम्यम्।
या योऽप्यसि यादृक् त्वं
त्वमद्वितीयस्त्वमेवासि॥

4.

किमपि वपुरिदं सेन्द्रिय-
मितः कदाचित्ततः परिभ्राम्यत्।
स्मारं स्मारं भवतो-
ऽनुग्रहमात्मप्रभां तनुते॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

5.

विवदन्तां सुधियस्ते
वपुरन्यच्चान्य एष आत्मा मे।
सर्वत्राभेदमति-
र्वर्तेऽत्राप्यहमभेदमतिः॥

6.

वपुषा मनसा सहितः
प्राणात्मा लोकसंग्रहं कुरुते।
वाङ्मनसाभ्यां हीनः
किमसौ कस्याहितं हितं कुर्यात्॥

7.

रम्या इमाः सुमनसो
विभिन्नवर्णा विभिन्नरसगन्धाः।
मिथ्या चेन्नहि मिथ्या
हेयं कथमपि तदेव सत्यं नः॥

8.

परमः स चित्रकारः
स एव शिल्पी तथा परमपरमः।
कल्पयति चित्रमेतत्
पूर्वं रेखात्मकं सर्वम्॥

9.

नेदं मिथ्या नापि च
सत्यं सर्वं न वा तिरस्कार्यम्।
प्रतीकमेतं सम्यक्
परीक्ष्य विश्वं स निर्माता॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

10.

पुरुषोत्तमः स कुशलः
पुनः प्रयुङ्क्ते पुनश्च चित्रमिदम्।
सृजति भुनक्ति निरस्यति
पूर्णत्वमनाः कृतिमपूर्णाम्॥

11.

पूर्णः स परम आत्मा
पूर्णास्ति तस्य तूलिकाशक्तिः।
चित्रमपूर्णं प्रथमं
किमिदं तन्नास्ति विदितं नः॥

12.

सुन्दरतायाः सर्गः
कथमिव मिथ्या विवर्ण्यते तज्ज्ञैः।
द्वन्द्वात्मकमपि निखिलं
शिवं च सत्यं च रमणीयम्॥

13.

तरुरेष हरितहरितः
सरिदियमनिशं प्रवाहगतिगीता।
गिरिरेष तुङ्गशिखरः
किमिमे सर्वे मृषा दृश्याः॥

14.

तारकितं नभ एत–
च्चन्द्रः सूर्योऽ निलोऽनलः-किमिमे।
मिथ्या सर्वे, तर्हि तु
सर्वं मिथ्यात्मकं सत्यम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

15.

जहिहि विवादान् सर्वान्
सत्या तनुरपि मनोऽपि नासत्यम्।
शाखामध्यासीनो
न मन्यसे तां कथं सत्याम्॥

16.

आत्मा प्रसन्न इन्द्रिय-
गणः प्रसन्नः प्रसन्नमेव मनः।
तनुते प्रसादकिरणा-
नखिलासु दिशासु रम्याँस्तान्॥

17.

गगनमणिः स्वं बिम्बं
विहाय किमसौ तनोति करशक्तीः।
अपि निजमण्डलरहितो
निशाकरश्चन्द्रिकां तनुते॥

18.

अव्यक्तमेव मूलं-
प्ररोह-जनकं समस्तभूतानाम्।
जाने तत् किन्तु कथं
प्ररोहजातं तिरस्कुर्याम्॥

19.

सत्ताऽस्ति परा कर्म-
द्रव्यगुणमयी समूहनिष्ठा सा।
एका सा किन्त्वस्या
अनन्तवर्णा विभा अपराः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

20.

एकं मूलममूर्त्तं
नैकाः शाखा अनेकपर्णसुमाः।
अव्यक्तव्यक्तमयं
विश्वमनन्तं तथाप्येकम्॥

21.

एकस्मिन्नेवमिदं
निहितमनन्तं समग्रमपि सत्यम्।
पश्यसि यदपि बहिस्त्वं
सर्वं तद् वर्त्ततेऽन्तस्ते॥

22.

तनुरियमपरिच्छिन्नं
त्वां नालं बन्द्धुमाततं जातु।
त्वमसि बहिस्त्वं चान्तः
सर्वं त्वयि सर्वतस्त्वमसि॥

23.

त्वं बहिरन्तस्त्वं भोः
सम्यग् भावय सुभावनामेताम्।
नहि कश्चिदसम्मान्यः
तवैव सर्वं सुसम्मान्यम्॥

24.

त्वं सर्वत्र च सर्वं
त्वयि स्थितं वेत्सि सर्वमेतत् त्वम्।
किन्तु दुरुपयुज्य समं
तनुषे सर्वत्र वैषम्यम्॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

25.

अस्त्येषाऽरण्यानी
तवैव तां निर्ममं छिनत्सि त्वम्।
सरिदपि निर्मलधारा
तवैव तामपि सुदूषयसि॥

26.

सर्वं त्वदीयमिति यत्
सत्यं तत्त्वं सदाऽपलापयसि।
बद्धः स्वयं समस्तं
बन्धुं हन्तुं सदा यतसे॥

27.

चक्रवर्ती महाराज आसीत् पुरा
कोऽपि, नासीत् क्वचित् तस्य कश्चिद्रिपुः।
किन्तु युद्धप्रियो राजधानी निजां
स स्वयं दग्धवानस्त्रशस्त्रै र्निजैः॥

28.

दग्धवान् राजधानीं समस्तां निजां
हर्म्यमत्यन्तरम्यं निजं दग्धवान्।
एकलः केवलो जीवितोऽसौ तदा
किं निरीक्षेत कुत्र स्वकीयं निधिम्॥

29.

तस्य बोधस्तदाऽभूत् कथं विस्मृतं
स्वं विशालं स्वरूपं स्वयं व्यापकम।
नैव सीमा वपुस्तस्य विश्वं समं
तस्य सीमा, त्वनन्तो ह्यसौ वस्तुतः॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

30.

अस्ति नेयं पुराणी कथा, मानवो
ऽद्यापि नो वेद राज्यं निजं व्यापकम्।
पर्वतानर्णवान् काननानि स्वयं
हन्ति शस्त्रैः कुमन्त्रैश्च तैर्घातकैः॥

31.

अङ्गुलिं स्वां तु मन्येत कश्चिन्निजां
हस्तमेतं स्वकीयं परं भावयन्।
तादृशं लक्षणं मानवैः कार्यते
स्वीयतास्वेतरात्मत्वयोः साम्प्रतम्॥

32.

तर्हि हस्तोऽन्यदीयो यथा छिद्यता-
मङ्गुलिश्च स्वकीयाऽमृतैर्लिप्यताम्।
एष एव क्रमो मानवैः स्वीकृतो-
ऽद्याखिलां दूषयत्येव सर्वंसहाम्॥

33.

अस्ति तावान् निधिर्ज्ञानविज्ञानयोः
सञ्चितो मानवैः पुस्तकेऽन्तर्हितः।
किन्तु भाष्यं तदीयं सदैवान्यथा
कृत्यमप्येवमेवास्ति तस्यान्यथा॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रामकरणशर्मा

कृश्त्वब्दानुसारिणी जन्मतिथि: 20.3.1927। बिहारराज्यसारणमण्डलान्तर्गते शिवपुरे लब्धजन्मा। राष्ट्रहुतात्मन: कामेश्वरप्रसादशर्मण: सूनु:। वेदवेदाङ्ग-पुराणेतिहास- साहित्यषड्दर्शना-युर्वेदावारपारीणस्य गन्नीपुरमोदफलपुरस्थ- लोकमान्य-ब्रह्मचर्याश्रम-कुलपते: अम्बिकादत्तशर्मण: शिष्य:। द्राविड- भारोपीयभाषा- साहित्यतत्त्वविद आचार्य-एम. बी. एमेनिउ- महोदयस्यान्तेवासी (फुलब्राइटयोजनायां कैलिफोर्नियाविश्वविद्यालये)।

बाल्यादेवाविरतमसेवत, सेवते च सुरभारतीम्। अकवयत् किमपि किमपि बाल्येऽपि श्रीगुरुचरणै: प्रेरित:। "मा भैषी"- रिति प्रथमा स्रग्धरा। "तुलसास्तव" इति प्रकाशिता प्रथमा रचना (ग्रीयर भूमिहार-ब्राह्मणकालेज़- पत्रिका-वैशाली, 1943)। मदालसाकाव्यं (प्रथमसर्गमात्रं) 1954 तमे वर्षे प्रकाशितम्। अनेका: कविता: प्रकाशिता:, संस्कृतप्रतिभादूर्वाद्यासु पत्रिकासु। 'शिवशुकीयम्', 'सन्ध्या' (साहित्य अकादमी-पुरस्कृता), 'पाथेयशतकम्', 'वीणा', 'दीपिका', 'सर्वमङ्गला', 'गगनवाणी' इति च काव्यसङ्ग्रहा: प्राकाशिषत। 'सीमा' (भारतीयभाषा- परिषत्पुरस्कृता), 'रयीश' इति च द्वावुपन्यासौ प्राकाश्यं नीतौ।

शोधग्रन्था: निबन्धा अनेके महाभारतं, चरकसंहितां, व्याकरणं, भाषाविज्ञानं, काव्यं, दर्शनं, पुराणानि चाधिकृत्य प्रकाशिता:। एतदीयं 'शिवसहस्रनामाष्टकम्', विशेषेणोल्लेख्यम्। चरकसंहिताया: पञ्च खण्डा:, आयुर्वेद-रसायनप्रतिपादको ग्रन्थश्च तथैव लोकप्रिया:।

मदानि भूयांसि सत्कृतानि। अद्यत्वेऽन्ता-रष्ट्रियसंस्कृतविद्यासमवायाध्यक्ष:। तत्प्रवर्तिता मन्दाकिनी (संस्कृत-परिषद्) अन्याश्च भूयस्य: संस्कृतसंस्था वर्तन्ते, वर्तिष्यन्ते च तस्य सेव्या:।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RATIBHA

PRATIBHA PRAKASHAN
(ORIENTAL PUBLISHERS & BOOK SELLERS)
29/5, SHAKTI NAGAR, DELHI-110 007
PHONE : 7451485

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.